# वाटिका

6



# उत्तर प्रदेश बेसिक शिक्षा परिषद्

# संस्कृत पीयूषम्

## (कक्षा 4)

# भारत-वन्दना

मातृभूमे! नमो मातृभूमे! नमः।
मातृभूमे! नमो मातृभूमे! नमः।।
तव गिरिभ्यो नमस्ते नदीभ्यो नमः।
तव वनेभ्यो नमो जनपदेभ्यो नमः।।
तव कणेभ्यो नमस्ते अणुभ्यो नमः।
मातृभूमे! नमो मातृभूमे! नमः।।
प्राणदे! त्राणदे! देवि! शक्तिप्रदे!
ऋद्धिदे! सिद्धिदे! भुक्तिमुक्तिप्रदे!।।
सर्वदे! सर्वदा देवि! तुभ्यं नमः।
मातृभूमे! नमो मातृभूमे! नमः।।

## शब्दार्थाः

मातृभूमे! = हे मातृभूमि (सम्बोधन)। नमः = नमस्कार (अस्ति)। तव = तुम्हारे। गिरिभ्यः = पर्वतों को। नदीभ्यः = नदियों को। वनेभ्यः = जंगलों को। जनपदेभ्यः = राज्यों (प्रान्तों) को। कणेभ्यः = कणों को। अणुभ्यः = अणुओं को। प्राणदे! = प्राण देने वाली। त्राणदे! = त्राण देने वाली, रक्षा करने वाली। शक्तिप्रदे! = शक्ति प्रदान करने वाली। ऋद्धिदे! = सम्पन्नता देने वाली। सिद्धिदे! = सिद्धि (पूर्णता) देने वाली। भुक्तिमुक्तिप्रदे! = भोग और मुक्ति (मोक्ष) देने वाली। सर्वदे! = सब कुछ देने वाली (सभी सम्बोधन के रूप)। सर्वदा = सदा। तुभ्यम् = तुमको।

**अन्वयः-**
हे मातृभूमे! (तुभ्यम्) नमः। हे मातृभूमे! (तुभ्यम्) नमः। तव गिरिभ्यः नमः। तव नदीभ्यः नमः। तव वनेभ्यः नमः। तव जनपदेभ्यः नमः। तव कणेभ्यः नमः। तव अणुभ्यः नमः। हे मातृभूमे! (तुभ्यम्) नमः। हे मातृभूमे! (तुभ्यम्) नमः। हे देवि! हे प्राणदे! हे त्राणदे! हे शक्तिप्रदे! हे ऋद्धिदे! हे सिद्धिदे! हे भुक्तिप्रदे! हे मुक्तिप्रदे! हे सर्वदे! तुभ्यं सर्वदा नमः। हे मातृभूमे! नमः। हे मातृभूमे! नमः।

**भावार्थः-**हे मातृभूमि! तुम्हें नमस्कार है। हे मातृभूमि! तुम्हें नमस्कार है।
हे मातृभूमि ! तेरे पर्वतों को नमस्कार है, तेरी नदियों को नमस्कार है।

तेरे वनों को नमस्कार है और तेरे जनपदों (प्रान्तों) को नमस्कार है।
हे मातृभूमि! तेरे कणों को नमस्कार है, तेरे अणुओं को नमस्कार है।
हे मातृभूमि! तुम्हें नमस्कार है। हे मातृभूमि! तुम्हें नमस्कार है।
हे प्राण देने वाली, रक्षा करने वाली, शक्ति देने वाली, सम्पन्नता देने वाली, पूर्णता देने वाली, भोग और मुक्ति देने वाली हे देवि! (तुम्हें नमस्कार है)।
हे सब कुछ सदा देने वाली देवि! तुम्हें नमस्कार है।
हे मातृभूमि! तुम्हें नमस्कार है। हे मातृभूमि! तुम्हें नमस्कार है।

**शिक्षण-सङ्केतः**

वन्दनागीतस्य सामूहिकं गानं कारयत।

**एतदपि जानीत-**

कम्प्यूटर के लिए सबसे उपयुक्त भाषा संस्कृत को माना गया है।

# प्रथमः पाठः चित्रपाठः

## (लिङ्गम्, वचनम्, लट्लकारः प्रथमपुरुषः च)
## (क) पुंल्लिङ्गम्

एकवचनम् द्विवचनम् बहुवचनम्



अश्वः धावति। अश्वौ धावतः। अश्वाः धावन्ति।
(एक घोड़ा दौड़ता है) (दो घोड़े दौड़ते हैं) (बहुत-से घोड़े दौड़ते हैं)
कः धावति? कौ धावतः? के धावन्ति?



नरः खादति। पथिकौ गच्छतः। बालकाः खेलन्ति।
(एक पुरुष खाता है) (दो राही जाते हैं) (बहुत-से बालक खेलते हैं)
सः खादति। तौ गच्छतः। ते खेलन्ति।

## (ख) स्त्रीलिङ्गम्



बालिका पठति। बालिके पठतः। बालिकाः पठन्ति।
(एक लड़की पढ़ती है) (दो लड़कियाँ पढ़ती हैं) (बहुत-सी लड़कियाँ पढ़ती हैं)
का पठति? के पठतः? काः पठन्ति?

  

अजा जलं पिबति। छात्रे सूर्यं नमतः। चटकाः उड्डयन्ति।
(एक बकरी जल पीती है) (दो छात्राएँ सूर्य को नमस्कार करती हैं) (बहुत-सी चिड़ियाँ उड़ती हैं)
सा जलं पिबति। ते सूर्यं नमतः। ताः उड्डयन्ति।

## (ग) नपुंसकलिङ्गम्

**एकवचनम् द्विवचनम् बहुवचनम्**

  

फलं पतति। फले पततः। फलानि पतन्ति।
(एक फल गिरता है) (दो फल गिरते हैं) (बहुत-से फल गिरते हैं)
किं पतति? के पततः? कानि पतन्ति?

  

जलं प्रवहति कमले विकसतः। पुष्पाणि विकसन्ति।
(पानी बहता है।) (दो कमल खिलते हैं।) (बहुत-से पुष्प खिलते हैं।)
तत् प्रवहति। ते विकसतः। तानि विकसन्ति।

### शब्दार्थाः

| पुंल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| कः = कौन | का = कौन | किम् = कौन |
| कौ = कौन दोनों | के = कौन दोनों | के = कौन दोनों |
| के = कौन सब | काः = कौन सब | कानि = कौन सब |
| सः = वह | सा = वह | तत् = वह |

तौ = वे दोनों ते = वे दोनों ते = वे दोनों
ते = वे सब ताः = वे सब तानि = वे सब

**1. उच्चारणं कुरुत -**

अश्वौ गच्छतः उत्पतन्ति पुष्पाणि

**2. चित्रानुसारं संस्कृते उत्तरत -**

  

कः धावति ? का लिखति ? किं पतति ?



......................... ......................... .................. .......

 

के खेलन्ति ? काः उड्डयन्ति ? कानि विकसन्ति ? ......................... ..........................
..........................

**3. धातुषु प्रत्ययं योजयित्वा क्रियापदं रचयत -**

धातुः + प्रत्ययः = क्रियापदम्

यथा- खेल् (खेल) + ति = खेलति

नम् (नम) + ति = ..................

भू (भव्) (भव) + ति = ..................

पठ् (पठ) + ति = ..................

लिख् (लिख) + ति = ..................

गम् (गच्छ्) (गच्छ) + ति = ..................

**विशेषः-पढें और समझें**

1. 'अश्वः धावति' में 'धावति' क्रियापद है जो दौड़ने की क्रिया को बता रहा है।'धावति' शब्द में 'धाव' भाग को धातु तथा 'ति' भाग को प्रत्यय कहते हैं। इस प्रकार धाव+ति (धातु+प्रत्यय) के योग से क्रियापद 'धावति' बना है।

**4. धाव् (धाव)+ति=धावति, धाव् (धाव)+तः=धावतः, धाव् (धाव) +न्ति=धावन्ति**
**(एक दौड़ता है) (दो दौड़ते हैं ) (दो से अधिक दौड़ते हैं)**
**उपर्युक्तानुसारं धातुषु ति, तः, न्ति इति प्रत्ययान् योजयित्वा एकवचन-द्विवचन -बहुवचनरूपाणि लिखत-**
**धातुः एकवचनम् द्विवचनम् बहुवचनम्**
यथा- खेल् खेलति खेलतः खेलन्ति
पठ् ............ .......... ............
लिख् ........... ........... ............
गम् (गच्छ्) ........... ........... ............
विशेष-
(क) ‘अश्वः धावति’ वाक्य में घोड़े के लिए ‘अश्वः’ पद का प्रयोग हुआ है, इसे संज्ञा पद कहते हैं। क्रिया पद के समान ही संज्ञा पदों में भी एकवचन, द्विवचन और बहुवचन के रूप अलग- अलग होते हैं।
(ख) ‘अश्व’ शब्द के अन्त में ‘अ’ होने के कारण इसे ‘अकारान्त शब्द’कहते हैं।
**5. अश्वः अश्वौ अश्वाः**
**(एक घोड़ा) (दो घोड़े) (दो से अधिक घोड़े)**
**उपर्युक्तानुसारं पुंल्लिङ्गरूपाणि लिखत-**
**शब्दः एकवचनम् द्विवचनम् बहुवचनम्**
बालक ................ ................ .................
गज ................. ................ .................
मृग ................ ................ .................
सूर्य ................ ................ ................

**विशेष-** प्रथम पुरुष, जैसे- खेलति, खेलतः, खेलन्ति क्रियापद हमारे अथवा तुम्हारे से भिन्न किसी दूसरे के खेलने को बताता है। इसलिए इसे प्रथम पुरुष अथवा अन्य पुरुष की क्रिया कहते हैं।
**6. स्त्रीलिङ्ग-पदानां रूपाणि द्वितीया विभक्तौ रूपाणि लिखत-**
**शब्दः एकवचनम् द्विवचनम् बहुवचनम्**
यथा- अजा अजा अजे अजाः
(बकरी)
छात्रा ........... .......... ..........
**विशेष -**

1. संज्ञा पदों को तीन लिङ्गों में बाँटते हैं-
पुंल्लिङ्ग- बालक, सूर्य, गज आदि।
स्त्रीलिङ्ग-अजा, लता, चटका, बालिका आदि।
नपुंसकलिङ्ग-पुस्तक, कमल, पुष्प, मित्र आदि।
2. संज्ञा पदों से लिङ्ग का बोध होता है, किन्तु क्रिया पदों से लिङ्ग का बोध नहीं होता है। इसलिए संज्ञा के लिङ्ग का क्रिया पद पर कोई प्रभाव नहीं पड़ता है, जैसे-बालकः धावति (पुंल्लिङ्ग)। बालिका धावति (स्त्रीलिङ्ग)।
मित्रं धावति (नपुंसकलिङ्ग)।
एकवचनम्

**7. संज्ञापदानां नपुंसकलिङ्गे प्रथमविभक्तौ रूपाणि लिखत-**

**शब्दः एकवचनम् द्विवचनम् बहुवचनम्**
फल ........... ........... ...........
पुस्तक ........... ........... ...........
पुष्प ........... ........... ...........

**8. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-**

**ते खादति धावतः गच्छन्ति**
**ताः तानि प्रवहति सा**

(क) बालकः ............................. (ङ)................................. नमन्ति।
(ख) कुक्कुरौ ............................ (च) ............................... उत्पतति।
(ग) जलम् ............................ (छ) ................................. विकसन्ति।
(घ) गजाः ............................ (ज) ................................. धावन्ति।

**9. चित्रानुसारं संस्कृतपदानि लिखत-**



........................... ........................... ............................

**10.संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) दो आदमी खाते हैं। (ख) एक राही जाता है।
(ग) छात्राएँ नमस्कार करती हैं। (घ) एक बकरी चरती है।
(ङ) कमल खिलते हैं ।

**ध्यातव्यम्-**

(क) संस्कृते त्रीणि लिङ्गानि भवन्ति- पुंल्लिङ्गम्, स्त्रीलिङ्गम्, नपुंसकलिङ्गम् ।

(ख) संस्कृते त्रयः पुरुषाः भवन्ति - प्रथमपुरुषः, मध्यमपुरुषः, उत्तमपुरुषः।
(ग) संस्कृते त्रीणि वचनानि भवन्ति - एकवचनम्, द्विवचनम्, बहुवचनम् ।

**नाम-धामादि-परिचयः**

भवतः नाम किम्?  मम नाम वीरेन्द्रः अस्ति।

भवतः प्रदेशः कः? मम प्रदेशः उत्तरप्रदेशः अस्ति। भवतः जनपदः कः? मम जनपदः वाराणसी अस्ति। भवतः ग्रामः कः? मम ग्रामः उदयपुरम् अस्ति। भवान् कुतः आगतः? अहं वाराणसीतः आगतः अस्मि। अत्र कदा आगतः? अत्र ह्यः एव आगतः।
अत्र कुत्र स्थितः? अत्र छात्रावासे स्थितः अस्मि।
भवान् किं करोति? अहं अध्ययनं करोमि।
सुखम् उपविशतु। धन्यवादाः।
पुनः दर्शनं देयम्। बाढम्।
**विशेष-** परस्परं वार्तालापाय उपरि लिखितवाक्यानाम् अभ्यासं कारयत।

# द्वितीयः पाठः चित्रपाठः

## (क) सर्वनाम-प्रयोगः (किम्, इदम्, एतत्)

### पुंल्लिङ्गम्

**एकवचनम्**



अयं कः ?

अयं छात्रः।

छात्रः किं करोति ?

एषः छात्रः पुस्तकं पठति।



**द्विवचनम्**

इमौ कौ ?

इमौ गजौ स्तः।

एतौ किं कुरुतः?

एतौ गजौ जलं पिबतः।

**बहुवचनम्**



इमे के ?

इमे कपोताः।

एते किं कुर्वन्ति?

एते तण्डुलान् खादन्ति।

### स्त्रीलिङ्गम्



**एकवचनम्**

इयं का?

इयं बालिका।

एषा किं करोति?

एषा बालिका अम्बां नमति।



**द्विवचनम्**

इमे के?

इमे अजे।

एते किं कुरुतः ?

एते घासं चरतः।

**बहुवचनम्**



इमाः काः?

इमाः बालिकाः।

एताः किं कुर्वन्ति

एताः पुस्तकानि पठन्ति।

# नपुंसकलिङ्गम्



**एकवचनम्**

इदं किम्?

इदं पुष्पम्।
एतत् पुष्पं कीदृशम् अस्ति ?
एतत् पुष्पं सुन्दरम् अस्ति।



**द्विवचनम्**

इमे के स्तः?
इमे फले स्तः।
एते फले कीदृशे स्तः?
एते फले मधुरे स्तः।





**बहुवचनम्**

इमानि कानि सन्ति?
इमानि चित्राणि सन्ति।
एतानि चित्राणि कीदृशानि सन्ति ?
एतानि चित्राणि सुन्दराणि सन्ति।

## (ख) 'युष्मद्-अस्मद्'-शब्दः

(मध्यमपुरुषः उत्तमपुरुषः च)

**अध्यापकः** - हे बालक! त्वं किं पठसि?  



**बालकः-** श्रीमन्! अहम् इतिहासं पठामि।

**अध्यापकः-** हे बालकौ!युवां किं पठथः?
**बालकौ-** आवां संस्कृतभाषां पठावः।
**अध्यापकः-** शोभनम्। इयं भाषा सरला मधुरा च अस्ति।

**अध्यापकः-** हे बालकाः! यूयं किं पठथ?
**बालकाः-** श्रीमन् ! वयं विज्ञानं पठामः।
**अध्यापकः-** बाढम्। विज्ञानं जीवने आवश्यकं भवति।
**अध्यापकः-** जानीथ! पठनेन ज्ञानं भवति क्रीडनेन च शरीरं स्वस्थं भवति।
**बालकाः-** आम् श्रीमन्! वयं मनोयोगेन पठामः, स्नेहेन खेलामः,
सदा प्रसन्नाः च भवामः।

**शब्दार्थाः**

अयम् =यह (पुंल्लिङ्गम्) इयम् = यह (स्त्री0) इदम्=यह (नपुंसक0)
इमौ = ये दोनों ( “ ) इमे = ये दोनों ( “ ) इमे=ये दोनों ( “ )
इमे = ये सब ( “ ) इमाः = ये सब ( “ ) इमानि=ये सब ( “ )
एषः = यह ( “ ) एषा = यह ( “ ) एतत्=यह ( “ )
एतौ = ये दोनों ( “ ) एते = ये दोनों ( “ ) एते=ये दोनों ( “ )
एते = ये सब ( “ ) एताः = ये सब ( “ ) एतानि= ये सब ( “ )
त्वम् = तुम (तीनों लिङ्ग) युवाम् = तुम दोनों (तीनों लिङ्ग) यूयम्=तुम सब (तीनों लिङ्ग)
अहम् = मैं ( “ ) आवाम् = हम दोनों ( “ ) वयम्=हम सब ( “ )

## अभ्यासः

**1. संज्ञाशब्दानां स्थाने सर्वनामशब्दानां प्रयोगं पश्यत-**

(क) छात्रः पठति। (ख) अश्वाः धावन्ति।
कः पठति? ते धावन्ति।
(ग) छात्रा वदति। (घ) बालकः नमति।
इयं वदति। एषः नमति।
(ड) पत्रं पतति। (च) बालकौ गच्छतः।
तत् पतति। इमौ गच्छतः

**विशेष**-(क) किसी व्यक्ति, वस्तु, स्थान तथा गुण अथवा भाव के नाम को संज्ञा कहते हैं, जैसे- बालक, कलम, प्रयाग, सुन्दरता, कोमलता आदि।
(ख) संज्ञा के स्थान पर जिन शब्दों का प्रयोग किया जाता है उन्हें सर्वनाम कहते हैं, जैसे- वह, यह, कौन, मैं, तुम, आदि।
बालक जाता है। वह जाता है।
**(संज्ञा) (सर्वनाम)**

सर्वनामपदैः सह उचितक्रियापदानां प्रयोगं कुरुत-

**सर्वनाम-पदम् क्रिया-पदम्**

सा सन्ति
अयम् पठति
एतौ गच्छन्ति
एताः धावतः
इदम् पतति
एते नमतः
सः खेलति
कौ अस्ति

**विशेष-**

1. एषः गजः गच्छति।
2. ताः बालिकाः पठन्ति।
3. इमानि फलानि मधुराणि सन्ति।

उपर्युक्त की भाँति आपने पढ़ा कि संज्ञापदों के साथ भी सर्वनामपदों का प्रयोग होता है। यह ध्यान रहे, संज्ञापदों में जो लिङ्ग और वचन होता है उसी लिङ्ग और वचन में सर्वनामपदों का प्रयोग किया जाता है। इस प्रकार सर्वनाम में भी तीनों लिङ्ग और तीनों वचन होते हैं।

**2. चित्रानुसारं संस्कृते उत्तरत-**

   

इमौ कौ स्तः ? एताः किं कुर्वन्ति ? एतानि कानि सन्ति?

...................... ....................... ...........................

**3. मध्यमपुरुषस्य 'क्रियायाः' प्रयोगं कुरुत-**

(क) त्वम् ..... । (लिख्) (ख) युवाम् ..... । (पठ्) (ग) यूयम् ......। (धाव्)

**4. उत्तमपुरुषस्य 'कर्तुः' प्रयोगं कुरुत-**

(क) ....... शिक्षकं नमामि। (ख) ....... पुस्तकं पठावः। (ग) ...... भोजनं कुर्मः।

**5. हिन्दीभाषायाम् अनुवादं कुरुत-**

(क) सा हसति। (ख) तत् फलं पतति।

(ग) यूयं पुस्तकं पठथ। (घ) वयं हसामः।

**6. संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) मैं खेलता हूँ। (ख) हम सब खाते हैं।

(ग) तुम दोनों लिखते हो। (घ) वे बालिकाएँ हैं।

**7. प्रथमपुरुषः मध्यमपुरुषः उत्तमपुरुषः**

**एक0 द्वि0 बहु0 एक0 द्वि0 बहु0 एक0 द्वि0 बहु0**

सः तौ ते त्वं युवां यूयम् अहं आवां वयम् सा ते ताः

बालकः बालकौ बालकाः

कर्ता केशवः केशवौ केशवाः

रेशमा रेशमे रेशमाः

क्रिया-पठति पठतः पठन्ति पठसि पठथः पठथ पठामि पठावः पठामः

**शिक्षण-सङ्केतः**

(क) पाठे आगतानां सर्वनामशब्दानाम् अभ्यासं परिशिष्टभागात् कारयत।

(ख) वाक्यानां वाचनं तथा लघु-संस्कृतवाक्यानां सहायतया प्रश्नोत्तराणां गतिविधिं कारयत।

**'विद्या ददाति विनयम्'**

# तृतीयः पाठः विभक्तयः





**(क) तृतीया विभक्तिः**

इदं क्रीडाक्षेत्रम् अस्ति। बालकाः कन्दुकेन खेलन्ति। केचिद् बालकाः वेगेन धावन्ति। वयं नेत्राभ्याम् बालकान् पश्यामः। बालकाः सहचरैः सह क्रीडन्ति। अत्र बालिकाः अपि उत्साहेन क्रीडन्ति।

**(ख) चतुर्थी विभक्तिः**

विद्यालयाः शिक्षायै भवन्ति। छात्राः पठनाय विद्यालयं गच्छन्ति। वयमपि पठनाय विद्यालयं गच्छामः। यूयमपि शिक्षायै तत्र गच्छथ। ते च ताः च शिक्षायै एव विद्यालयं गच्छन्ति। सा पुस्तिकाभ्यः आपणं गच्छति। ततः नेत्राभ्याम् अञ्जनं च आनयति।

**(ग) पञ्चमी विभक्तिः**

इदम् उपवनं ग्रामात् बहिः अस्ति। जनाः गृहेभ्यः अत्र आगच्छन्ति। मालाकारः कूपात् जलम् आनयति। सः जलेन वृक्षान् सिञ्चति। यदा फलानि पक्वानि भवन्ति तदा तानि वृक्षेभ्यः पतन्ति। उपवनरक्षकः उपवनात् फलानि आपणं नयति। जनाः तानि आपणात् गृहं नयन्ति।




**(घ) षष्ठी विभक्तिः**

इदम् एकं सुन्दरम् उद्यानम् अस्ति। यदा प्रातः सूर्यस्य प्रकाशः भवति, तदा प्रकाशेन उद्यानस्य शोभा भवति। वायुः मन्दं-मन्दं वहति। पुष्पाणि विकसन्ति। पुष्पाणां गन्धः प्रसरति। भ्रमराः कुसुमानाम् उपरि गुञ्जन्ति। कोकिलाः वृक्षाणाम् उपरि कूजन्ति। संजीवस्य पिता उद्यानं रक्षति। तस्य माता पादपान् सिञ्चति।

**(ङ) सप्तमी विभक्तिः**

प्रातःकाले वयम् उद्यानं गच्छामः। उद्याने जनाः विचरन्ति। तत्र वयं वृक्षान् पश्यामः। उद्याने वटः आम्रः निम्बः अश्वत्थः अन्ये च अपि वृक्षाः सन्ति। खगाः वृक्षेषु निवसन्ति। वृक्षेषु पक्वानि फलानि सन्ति। लतासु कुसुमानि विकसन्ति। उद्याने एकः तडागः अपि अस्ति। जले कमलानि विकसन्ति। कमलेषु भ्रमराः गुञ्जन्ति। तडागे मत्स्याः अपि सन्ति। सायंकाले बालकाः बालिकाः च उद्याने क्रीडन्ति। सम्प्रति वायु-प्रदूषणस्य दूरीकरणाय नगरे उद्यानम् आवश्यकम्।

**शब्दार्थाः**

क्रीडाक्षेत्रम् = खेल का मैदान। वेगेन = तेज गति से। सहचरैः सह = मित्रों के साथ। उत्साहेन = खुशी से। शिक्षायै = शिक्षा के लिए। आपणम् = बाजार। बहिः = बाहर। पक्वानि = पके हुए। कोकिलाः = कोयलें। पादपान् = पौधों को। सिञ्चति = सींचती है। तडागः = तालाब। भ्रमराः = भँवरे। गुञ्जन्ति = गूँजते हैं। सम्प्रति = इस समय। अश्वत्थः = पीपल का वृक्ष ।

**अभ्यासः**

**1. उच्चारणं कुरुत-**

**क्रीडाक्षेत्रम् शिक्षायै गुञ्जनम्**

**उत्साहेन पुस्तिकाभ्यः अश्वत्थः**

**2. एकपदेन उत्तरत-**

(क) बालकाः केन क्रीडन्ति?

(ख) छात्राः किमर्थं विद्यालयं गच्छन्ति ?

(ग) फलानि केभ्यः पतन्ति?

(घ) प्रातः कस्य प्रकाशः भवति?

(ङ) भ्रमराः कुत्र गुञ्जन्ति ?

**3. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-**

**पुष्पाणाम् वृक्षेषु कूपात् शिक्षायै नेत्राभ्याम्**

(क) वयं बालकान् .......................... पश्यामः।

(ख) विद्यालयाः .......................... भवन्ति।
(ग) मालाकारः .......................... जलम् आनयति।
(घ) .......................... गन्धः प्रसरति।
(ङ) खगाः .......................... निवसन्ति।

**4. हिन्दी-भाषायाम् अनुवादं कुरुत-**

(क) बालकाः वेगेन धावन्ति।
(ख) वयम् अपि पठनाय विद्यालयं गच्छामः।
(ग) जनाः गृहेभ्यः अत्र आगच्छन्ति।
(घ) संजीवस्य पिता उद्यानं रक्षति।
(ङ) सायंकाले बालिकाः उद्याने क्रीडन्ति।

**5. संस्कृत-भाषायाम् अनुवादं कुरुत-**

(क) यह खेल का मैदान है।
(ख) वाहिद पढ़ने के लिए विद्यालय जाता है।
(ग) उद्यान गाँव से बाहर है।
(घ) भांेरे फूलों पर मडराते हैं।
(ङ) पेड़ों पर पके फल हैं।

**विशेष-**

धातुओं में ति, तः और अन्ति प्रत्यय लगाकर धातु के लट्लकार (वर्तमान काल) प्रथम पुरुष के रूप पृष्ठ संख्या 11 पर बनाये गये हैं। इसी प्रकार प्रत्यय लगाकर मध्यम पुरुष और उत्तम पुरुष के रूप बनते हैं।

**एक व. द्वि व. बहु व.**

मध्यम पुरुष- सि थः थ
उत्तम पुरुष- मि वः मः
प्रत्ययों के योग से ‘धाव्’ धातु के रूप-

**एक व. द्वि व. बहु व.**

म0 पु0 धावसि धावथः धावथ
उ0 पु0 धावामि धावावः धावामः

**6. अधोलिखित- धातुभिः सह उचित- प्रत्ययान् योजयित्वा मध्यमपुरुषस्य उत्तमपुरुषस्य च रूपनिर्माणं कुरुत-**

**एकवचनम् द्विवचनम् बहुवचनम्**

**खेल म0पु0**
**उ0पु0**

**पश्य(दृश्) म0पु0**
**उ0पु0**

**क्रीड् म0पु0**
**उ0पु0**

**आगच्छ् म0पु0**
**(आ+गम्) उ0पु0**

**अस् म0पु0**
**उ0पु0**

**7. चक्रद्वयात् पदानि आदाय पठ्धातोः उचितप्रयोगं कृत्वा वाक्यानि रचयत-**
यथा-त्वं किं पठसि ?




(क)..............................................................।
(ख)..............................................................।
(ग)..............................................................।
(घ)..............................................................।
(ङ)..............................................................।
(च)..............................................................।
(छ) ............................................................।
.

**विशेष-** सह (साथ) पद के पहले ‘तृतीया-विभक्ति’ का प्रयोग होता है- सहचरैः सह खेलति।
-देने अर्थ में जिसे दिया जाये, उसमें ’चतुर्थी विभक्ति’ होती है- छात्राय ज्ञानं ददाति।
- अलगाव में जो स्थिर रहे, उसमें ’पञ्चमी विभक्ति’ होती है- वृक्षात् पत्राणि पतन्ति।

**शिक्षण-सङ्केतः**

क. पाठस्य अनुच्छेदानां पृथक्-पृथक् छात्रैः वाचनं कारयत।
ख. विभक्तयः, कारकाणि च परिशिष्टे भागे सन्ति, तेषाम् अभ्यासं कारयत।
ग. शब्दानां धातूनां च रूपाणि परिशिष्टात् लेखयत।

**अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः।**

## (लोट्लकार-प्रयोगाः)

मा कुरु दर्पम्, मा कुरु गर्वम्
मा भव मानी, मानय सर्वम्।
मा भज दैन्यम्, मा भज शोकम्
मुदितमना भव, मोदय लोकम्।।1।।
मा वद मिथ्या, मा वद व्यर्थम्
न चल कुमार्गे, न कुर्वनर्थम्।
पाहि विपन्नम्, पालय दीनम्
लालय जननी-जनक-विहीनम्।।2।।
तनयं पाठय तनयां पाठय
शिक्षय नीतिं दोषं वारय।
कुरूपकारम्, कृत्यमुदारम्
अपनय दूरे चित्तविकारम्।।3।।
मा पिब किञ्चिद् वस्तु निषिद्धम्
मा भज दुर्व्यसनं परिहेयम्।
मा नय पलमपि व्यर्थं समयम्
कुरु जगदीश्वर-चिन्तनमभयम् ।।4।।

**शब्दार्थाः**

मा = मत, नहीं। कुरु = करो। दर्पम् = घमण्ड (अकड़)। गर्वम् = अभिमान। भव = हो। मानी = अभिमान करने वाला। मानय = सम्मान दो। भज = रखो। दैन्यम् = दीनता। मुदितमना = प्रसन्न मन। मोदय = प्रसन्न करो। वद = बोलो। मिथ्या = झूठ। व्यर्थम् = बेकार। अनर्थम् = बुरा। पाहि = रक्षा करो। विपन्नम् = दुःखी। लालय = लालन-पालन करो। विहीनम् = रहित को। तनयम् = पुत्र को। तनयां = पुत्री को। पाठय = पढ़ाओ। वारय = दूर करो। कृत्यम् = कार्य। चित्तविकारम् = मन के दोष को। अपनय = हटाओ। दुर्व्यसनम् = खराब आदत। परिहेयम् = त्याग करने योग्य, त्याज्य।

**अन्वयः**

1. दर्पं मा कुरु। गर्वं मा कुरु। मानी मा भव। सर्वं मानय। दैन्यं मा भज। शोकं मा भज। मुदितमना भव। लोकं मोदय।
2. मिथ्या मा वद। व्यर्थं मा वद। कुमार्गे न चल। अनर्थं न कुरु। विपन्नं पाहि। दीनं पालय। जननी- जनकविहीनं लालय।

3. तनयं पाठय। तनयां पाठय। नीतिं शिक्षय। दोषं वारय। उदारं कृत्यम्। उपकारं कुरु। चित्तविकारं दूरम् अपनय।

4. निषिद्धं किञ्चिद् वस्तु मा पिब। परिहेयम् दुर्व्यसनं मा भज। पलम् अपि समयं व्यर्थं मा नय। अभयं जगदीश्वर-चिन्तनं कुरु।

## अभ्यासः

**1. एकपदेन उत्तरत-**

(क) कं पालय ? (ख) किं शिक्षय ?

(ग) किं अपनय ? (घ) किं मा पिब ?

**2. त्याज्यकार्याणां करणीयकार्याणां च सूचीं लिखत-**

**त्याज्यकार्याणि करणीयकार्याणि**

**यथा-** असत्यभाषणम् **यथा-** उपकारम्

............................ ............................

............................ ............................

............................ ............................

**3. चित्रानुसारं वाक्यानि रचयत-**

**<u>प्रथमपुरुषः</u>**



................................ ......................... ............................

**मध्यमपुरुषः**



................................ ................................ ................................

**उत्तमपुरुषः**



............................... ............................... ...............................

**4. हिन्दी भाषायाम् अनुवादं कुरुत-**

(क) गर्वं मा कुरु। (ख) लोकं मोदय।

(ग) व्यर्थं मा वद। (घ) समयं व्यर्थं मा कुरु।

(ङ) कलमेन लिख। (च) किंचिद् निषिद्धं वस्तु मा पिब।

**5. कवितां पूरयत-**

(क) मा भज दैन्यम् ........................। ................................... लोकम्।।

(ख) ..........................................व्यर्थम्। .......................... न कुरु अनर्थम्।

(ग) ......... पाठय ...............पाठय। ..................................... कृत्यमुदारम्।

(घ) मा पिब ..........................................।....................................... परिहेयम्।

**ध्यातव्यम्-**

आज्ञार्थं निवेदनस्य च कृते लोट्लकारस्य प्रयोगः भवति, यथा- कुरु (करो), मा वद (मत बोलो) गच्छतु (जाओ), पठन्तु (पढ़े)।

**शिक्षण-सङ्केत**

1. अस्य पाठस्य पद्यानां गायनं कारयत।

2. लोट्लकारस्य (आज्ञार्थकस्य) वाक्यानाम् अभ्यासं कारयत।

# पञ्चमः पाठः मम विद्यालयः

## (दीर्घसन्धिः गुणसन्धिश्च)

उषा- चेतने! तव विद्यालयः कुत्रास्ति?

चेतना- मम विद्यालयः अत्र एव नगरे अस्ति। तत्र एकः सुन्दरः पुस्तकालयः एकं विशालं क्रीडाङ्गणं च स्तः।



उषा- तव विद्यालये कति शिक्षकाः सन्ति ?

चेतना- मम विद्यालये एकादशाध्यापकाः सन्ति।

उषा- तत्र कति छात्राः पठन्ति ?

चेतना- तत्र शताधिकाः छात्राः पठन्ति। ते सायं क्रीडाङ्गणे खेलन्ति च।

उषा- किं तव विद्यालये परिचारकाः सन्ति?

चेतना- आम् सन्ति, रमेशः दामोदरः चेति द्वौ परिचारकौ स्तः। धनेश्वरी सुशीला किशोरी चेति तिस्रः परिचारिकाः अपि सन्ति।

उषा- मम विद्यालये एकः रामनाथनामकः परिचारकः अस्ति, यः पुस्तकालये कार्यं करोति।

चेतना- अस्माकं विद्यालये यः दामोदरनामकः परिचारकः अस्ति, सः समये-समये घण्टां वादयति।

उषा- मम विद्यालये ग्रीष्मर्तौ एकमासस्यावकाशः भवति।

चेतना- किं तत्र शीतर्तौ अवकाशः न भवति?

उषा- कथं न । तत्रापि भवति।

चेतना- मम विद्यालये सर्वे अध्यापकाः महर्षितुल्याः कर्तव्यपरायणाः शिष्यवत्सलाश्च सन्ति।

उषा- तवाग्रजः सुधीन्द्रः क्वास्ति, किं करोति च।

चेतना- सः प्रयागे वसति। तत्र एकस्मिन् महाविद्यालये विज्ञानविषयम् अध्यापयति।

उषा- तवानुजः रवीन्द्रः किं करोति ?

चेतना- स तु सम्प्रति दशमकक्षायां पठति।

उषा- तम् अहं शिवालये अपश्यम्।

चेतना- सः प्रतिदिनं शिवस्य दर्शनाय तत्र गच्छति, ततः स्वकक्षायां समयेनोपस्थितः भवति। सः नित्यं भानूदये स्नानादिकं करोति, पाठाभ्यासं च करोति।
उषा- शोभनम्। एवंविधाः छात्राः जीवने सफलाः भवन्ति।

**शब्दार्थाः**

कति = कितने। आम् = हाँ । शताधिकाः = सौ से अधिक। वादयति = बजाता है। शीतर्तौ = (शीत + ऋतौ) जाड़े के मौसम में। तत्रापि = वहाँ भी। शिष्यवत्सलाः = शिष्य पर स्नेह करने वाले। एवंविधाः = इस प्रकार के। अपश्यम् = देखा। परिचारकः = सेवक । परिचारिकाः = सेविकाएं । अध्यापयति = पढ़ाता है। भानूदये = सूरज उगने के समय।

**अभ्यासः**

**1. उच्चारणं कुरुत-**
क्रीडाङ्गणम् एकादशाध्यापकाः ग्रीष्मर्तौ
शीतर्तौ शिष्यवत्सलाश्च समयेनोपस्थितः

**2. एकवाक्येन उत्तरत-**
(क) विद्यालये विशालं किम् अस्ति? (ख) क्रीडाङ्गणे छात्राः कदा खेलन्ति?
(ग) विद्यालये कति परिचारिकाः सन्ति? (घ) कः घण्टां वादयति?
(ङ) रवीन्द्रः नित्यं कदा स्नानं करोति? (च) सुधीन्द्रः कं विषयम् अध्यापयति ?

**ध्यातव्यम्**
(क) विद्यालयः इति पदे द्वौ शब्दौ स्तः- विद्या+आलयः। अत्र द्वे अक्षरे आ+आ इति मिलित्वा ‘आ’ इति भवति। अतः समान स्वर वर्णानां मेलः दीर्घसन्धिः भवति यथा-

**दीर्घ-सन्धिः**
अ + अ = आ
इ + इ = ई
उ + उ = ऊ
ऋ + ऋ = ॠ

(ख) रमेशः इति पदे द्वौ शब्दौ स्तः- रमा+ईशः। अत्र द्वे अक्षरे आ+ई इति मिलित्वा ‘ए’ इति भवति। असमान-वर्णानां मेलः गुणसन्धिः भवति यथा-

**गुण-सन्धिः**
अ + इ = ए
अ + उ = ओ
अ + ऋ = अर्
अ + लृ = अल्

**3. सन्धिं कृत्वा सन्धिनाम लिखत-**

यथा-विद्या+आलयः = विद्यालयः दीर्घ-सन्धिः
धन + ईश्वरी = धनेश्वरी गुण-सन्धिः
कुत्र+ अस्ति = .................... ....................
भानु + उदयः = .................... ....................
एकादश+ अध्यापकाः = .................... ...................
समयेन+ उपस्थितः = .................... ...................
शीत+ ऋतुः = .................... ...................

**ध्यातव्यम्**

''पढ़ा, देखा, किया, था'' - इत्यादिहिन्दीक्रियापदेभ्यः लङ्लकारस्य प्रयोगः भवति, यथा- अपठत्, अपश्यत्, अकरोत्, आसीत् - सः पाठम् अपठत् (उसने पाठ पढ़ा)।

**4. अधोलिखित-वाक्यानां लकार-परिवर्तनं कुरुत-**

**लट्लकारः लोट्लकारः लङ्लकारः**

यथा- ते लेखं लिखन्ति ते लेखं लिखन्तु ते लेखम् अखिलन्
त्वं चित्रं पश्यसि ............................ ..............................
वयं दुग्धं पिबामः ............................ ..............................
अहं प्रश्नं पृच्छामि ............................ ..............................
तौ श्लोकं वदतः ............................ ..............................

**5. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-**

घण्टाम् कुत्र छात्राः अवकाशः
(क) विद्यालयः .............. अस्ति ?
(ख) तत्र शताधिकाः .............. पठन्ति।
(ग) शीतर्तौ ................. भवति।
(घ) सः समये समये .................वादयति।

**6. संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) विद्यालय में कितने शिक्षक हैं? (ख) यहाँ तीन लिपिक हैं।
(ग) सुधीन्द्र कहाँ है और क्या करता है? (घ) वह दसवीं कक्षा में पढ़ता है।

**शिक्षण-सङ्केतः**

(क) कक्षायां छात्रैः संवादस्य वाचनं कारयत।

**तमसो मा ज्योतिर्गमय।**

# षष्ठः पाठः सूर्यः आत्मा जगतः

प्रातः सूर्यः उदेति। सूर्योदयेन सह दिवसारम्भः भवति। सूर्योदयात् प्राक् उषः कालो भवति,

यो हि  अतीव रमणीयः भवति। सर्वे ग्रहाः सूर्यं परिक्रामन्ति। पृथिवी अपि सूर्यं परिक्रामति। पृथिव्याः सूर्यस्य परिक्रमाकालः संवत्सरकालः। अतः सूर्य एव कालस्य कारणम्। अतएव जनाः प्रातः श्रद्धया सूर्यं नमन्ति। सूर्यस्यैव नामान्तराणि-भास्कर-प्रभाकर-दिवाकर- भानु-आदित्य-अर्क-रविप्रभृतीनि अनेकानि सन्ति।

सूर्य एव अस्माकं सर्वव्यवहाराणां प्रवर्तकः वर्तते। दिवसे एव जीवाः कार्याणि कुर्वन्ति। वनस्पतयः सूर्यप्रकाशं विना न जीवन्ति। छात्राः अध्यापकाः अन्ये कर्मचारिणः च पाठशालां कार्यशालां च दिवसे एव गच्छन्ति। भारतीयाः देवपूजनं यज्ञं च दिवसकाले एव कुर्वन्ति। ग्रीष्मर्तौ सूर्यः प्रचण्डं तपति। तदानीं सः सागरस्य जलं शोषयति। तस्य जलस्य सूर्योष्मणा

 वाष्पीकरणं भवति। तेन मेघाः प्रादुर्भवन्ति। वर्षर्तौ ते मेघाः वर्षन्ति। तेन कृषिकार्यं सम्भवति, शस्यानि प्ररोहन्ति। जीवाः शस्यान्नानि खादन्ति। अतः सूर्यः जीवनस्याधारः। वेदे कथितम्- ”सूर्यः आत्मा जगतस्तस्थुषष्च“ इति।

सूर्यः ऊर्जायाः अखण्डं भाण्डारम् अस्ति। सूर्यात् वयं प्रकाशम् उष्णतां च प्राप्नुमः। अतएव सर्वे जनाः सूर्यम् उष्णरश्मिं कथयन्ति। सूर्यप्रकाशे वयम् अन्यानि नक्षत्राणि न पश्यामः। सूर्यप्रकाशेन रोगकृमीणां नाशः भवति। सूर्यात् ऊर्जां गृहीत्वा यन्त्रचालनम् अपि सम्भवति। सूर्यप्रकाशे सप्तवर्णानां मेलनम् अस्ति। जलबिन्दुभिः सूर्यप्रकाशस्य विकिरणं भवति। तेन वर्षाकाले रमणीयः इन्द्रचापः आकाशे प्रादुर्भवति। अतः सूर्यः सर्वेषु देवेषु प्रमुखं दैवतम्। सुप्रसिद्धे गायत्रीमन्त्रे अपि सूर्यस्यैव प्रार्थना अस्ति। सूर्यस्य उदयकाले अस्तकाले च एकरूपतां विलोक्य कोऽपि कविः कथयति-

उदेति सविता ताम्रः ताम्र एवास्तमेति च।

सम्पत्तौ च विपत्तौ च महतामेकरूपता।।

उदेति = उगता है। सूर्योदयात् प्राक् = सूर्य के उदय होने से पहले। प्रेरणादायकः = प्रेरणा देने वाला। नामान्तराणि = दूसरे नाम। सर्वे = सभी। ग्रहाः = मंगल, बुध आदि ग्रह। परिक्रामन्ति = परिक्रमा करते हैं। कालस्य = समय का। सर्वव्यवहाराणां = समस्त व्यवहारों का। प्रवर्तकः = चलाने वाला जन्मदाता। न जीवन्ति = जीवित नहीं रहतीहैं। प्रचण्डम् = बहुत तेज। तदानीम् = उस समय। शोषयति = सोख लेता है। सूर्योष्मणा = सूर्य की (ऊष्मा से) गर्मी से। बाष्पीकरण = भाप बनने की क्रिया। प्रादुर्भवन्ति = उत्पन्न होते हैं। शस्यानि = फसलें। प्ररोहन्ति = उगती हैं। तस्थुषः = स्थावर/जड़ पदार्थों का। च = और। अखण्डम् = अक्षय। भाण्डारम् = भण्डार। नक्षत्राणि = तारों को। रोगकृमीणाम् = रोग के कीटाणुओं का। गृहीत्वा = लेकर। विकिरणम् = फैलाव। इन्द्रचापः = इन्द्रधनुष। एकरूपताम् = समानता को। विलोक्य = देखकर। कोऽपि = कोई भी। सविता = सूर्य। ताम्रः = लाल। अस्तमेति = अस्त होता है। सम्पत्तौ = सम्पन्नता में। महताम् = महान लोगों की।
अभ्यासः

**1. उच्चारणं कुरुत-**

परिक्रामन्ति नामान्तराणि प्रादुर्भवन्ति शस्यान्नानि महतामेकरूपता

**2. एकपदेन उत्तरत-**

(क) के सूर्यं परिक्रामन्ति?
(ख) सूर्यः कस्य कारणम्?
(ग) मेघाः कदा वर्षन्ति?
(घ) सूर्यः कस्याः भाण्डारम् अस्ति?
(ङ) वयं सूर्यात् किं प्राप्नुमः?
(च) गायत्रीमन्त्रे कस्य प्रार्थनास्ति?

**ध्यातव्यम्**

किमपि पदं यदा कस्यापि पदस्य विशेषतां कथयति, तदा तत् पदं विशेषणं भवति तथा यस्य विशेषतां कथयति, तत् पदं विशेष्यं भवति , यथा- शीतलं जलम्, उष्णं दुग्धम्। शीतलम्, उष्णं च विशेषणम् तथा जलं दुग्धम् च विशेष्यम्।
सर्वनामशब्दाः संख्यावाचकशब्दाः अपि विशेषणशब्दाः भवन्ति। विशेषणशब्दानां लिङ्गम्, वचनम्, विभक्तिः च विशेष्यपदानुसारं भवति , यथा- एषः एकः रमणीयः श्लोकः, ताः अनेकाः रमणीयाः लताः, इमानि त्रीणि रमणीयानि चित्राणि।

**3. एकवाक्येन उत्तरत-**

(क) सूर्योदयेन सह कस्यारम्भः भवति?

(ख) सूर्योदयात् प्राक् कः कालः भवति?
(ग) गायत्रीमन्त्रे कस्य वर्णनं कृतम्?
(घ) सूर्यस्य नामान्तराणि कानि?
(ङ) सूर्यः कस्य प्रवर्तकः?

**4 पाठात् विशेषण-पदं चित्वा लिखत-**

(क) ................................उषः कालः।
(ख) ............................................. सूर्यः।
(ग) .............................................. संवत्सरकालः।
(घ) ..................................... भाण्डारम्।
(ङ) ..................................... इन्द्रचापः।

**5. चित्रानुसारं संस्कृतपदानि रचयत-**

यथा-

 

सः एकः काकः अस्ति। .......................................
काकः श्यामलः भवति। .......................................

 

....................................... .......................................
....................................... .......................................

 

....................................... .......................................
....................................... .......................................

**6. हिन्दीभाषायाम् अनुवादं कुरुत-**

(क) सूर्योदयेन सह दिवसारम्भः भवति।

(ख) उषसः वर्णनं वेदमन्त्रेषु कृतमस्ति।
(ग) अस्माकं सर्वव्यवहाराणां प्रवर्तकः सूर्य एव अस्ति।
(घ) सूर्यप्रकाशेन रोगकृमीणां नाशः भवति।

**7. संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) सूर्य सबेरे उगता है।
(ख) नीतेश के घर कुत्ता है।
(ग) हम सूर्य से ऊर्जा पाते हैं।
(घ) उमेश अच्छा लड़का है।
(ङ) नदीम संस्कृत का छात्र है।

**शिक्षण-सङ्केतः**

प्रसङ्गानुसारं गायत्री- मन्त्रस्य अर्थोपदेशः करणीयः।

**एतदपि जानीत-**

**कुछ फलों के संस्कृत नाम-**

| **हिन्दी** | **संस्कृत** | **हिन्दी** | **संस्कृत** |
|---|---|---|---|
| आम | आम्रम् | जामुन | जम्बूफलम् |
| फूँट | स्फुटी | अनार | दाडिमम् |
| कटहल | पनसम् | कन्द | कन्दः |
| शरीफा | सीताफलम् | सिंघाड़ा | शृङ्गाटकः |
| बेर | बदरी | केला | कदली फलम् |
| किसमिस | क्षुद्रद्राक्षा | इमली | अम्लिका |
| मूँगफली | मण्डपी | अमड़ा | आम्रातकम् |
| बादाम | बादामम् | आँवला | आमलकम् |
| खजूर | खर्जूरम् | निम्बू | निम्बूकम् |
| छुहाड़ा | शुष्कखर्जूरम् | दाख/मुनक्का | द्राक्षा |
| अखरोट | अक्षौटकम् | ककड़ी | कर्कटी |

| | | | |
|---|---|---|---|
| अंगूर | द्राक्षा | खरबूजा | खर्बूजः |
| सेव | बदरम् /सेवम् | नारियल | नारिकेलम् |
| नाशपाती | रुचिफलम् | नारंगी | नारंगम |

# सप्तमः पाठः सुभाषितानि

**(लोट्लकारः)**

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।।1।।
त्यज दुर्जनसंसर्गं भज साधुसमागमम्।
कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम्।।2।।
षड्दोषाः पुरुषेणेह हातव्याः भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता।।3।।
उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते, तत्र देवः सहायकृत्।।4।।
गच्छन् पिपीलको याति योजनानां शतान्यपि।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।।5।।

**शब्दार्थाः**

निन्दन्तु = निन्दा करें। स्तुवन्तु = प्रशंसा करें। नीतिनिपुणाः = नीति में कुशल लोग। समाविशतु = आये। यथेष्टम् = इच्छानुसार। अद्यैव = आज ही। अस्तु = होवे (हो जाय)। युगान्तरे = युगों के बाद। वा = अथवा। प्रविचलन्ति = विचलित होते हैं। धीराः = धैर्यवान लोग। त्यज = छोड़ दो। संसर्गम् = साथ को। भज = सेवन करो। अहोरात्रम् = दिनरात। नित्यम् = चिरस्थायी (ंजो हमेशा रहे)। अनित्यताम् = अस्थायी (जो जल्दी ही नष्ट हो जाय, क्षणभङ्गुर)। हातव्या = छोड़ देना चाहिए। भूतिमिच्छता = सम्पत्ति, ऐश्वर्य चाहने वाले। तन्द्रा = जागते हुए सोना। दीर्घसूत्रता = धीरे-धीरे कार्य करना। आलस्यम् = शिथिलता(सुस्ती)। पिपीलकः = नर चींटी। वैनतेयः = गरुड़ (तेज उड़ने वाला पक्षी, विनता का पुत्र)।

**अन्वयः**

(1) नीति-निपुणाः निन्दन्तु यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु यथेष्टं गच्छतु वा मरणम् अद्य एव युगान्तरे वा अस्तु, धीराः न्याय्यात् पथः पदं न प्रविचलन्ति।
(2) दुर्जनसंसर्गं त्यज। साधुसमागमं भज। अहोरात्रं पुण्यं कुरु। नित्यम् अनित्यतां स्मर।
(3) भूतिमिच्छता पुरुषेण इह निद्रा, तन्द्रा, भयं, क्रोधः, आलस्यं, दीर्घसूत्रता-षड्दोषाः हातव्याः।
(4) यत्र उद्यमः, साहसं, बुद्धिः, शक्तिः, पराक्रमः एते षड् वर्तन्ते तत्र देवः सहायकृत्।

(5) गच्छन् पिपीलकः योजनानां शतानि अपि याति। अगच्छन् वैनतेयः अपि एकं पदं न गच्छति।

**1. उच्चारणं कुरुत -**
स्तुवन्तु यथेष्टम् अद्यैव
तन्द्रा उद्यमः षडेते पिपीलकः शतान्यपि पदमेकम्
**2. श्लोकांशान् योजयत -**
निद्रा तन्द्रा भयं क्रोधः, प्रविचलन्ति पदं न धीराः
न्याय्यात्पथः, बुद्धिःशक्तिः पराक्रमः
षडेते यत्र वर्तन्ते, हातव्याः भूतिमिच्छता,
षड्दोषाः पुरुषेणेह आलस्यं दीर्घसूत्रता,
उद्यमः साहसं धैर्यम् तत्र देवः सहायकृत्
**3. अधोलिखित क्रियापदानां निर्देशानुसारं लकारं पुरुषं वचन**ं च लिखत -
पदम् लकारः पुरुषः वचनम्
**यथा**-निन्दन्तु लोट् प्रथमपुरुषः बहुवचनम्
स्तुवन्तु ........... ................. ............
समाविशतु ........... ................. ............
प्रविचलन्ति ........... ................. ............
कुरु ........... ................. ............
**4. एकपदेन उत्तरत -**
(क) न्याय्यात् पथः पदं के न प्रविचलन्ति ?
(ख) कस्य संसर्गः त्याज्यः ?
(ग) अहोरात्रं किं कर्तव्यम् ?
**5. एकवाक्येन उत्तरत-**
(क) के षड्दोषाः पुरुषेण हातव्याः ?
(ख) देवः कुत्र सहायकृत् भवति ?
(ग) गच्छन् पिपीलकः कियत् याति ?
(घ) अगच्छन् वैनतेयः कियत् गच्छति ?
**6. पद्यांशानां भावार्थं लिखत-**
(क) लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
(ख) न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।
(ग) अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।
(घ) षडेते यत्र वर्तन्ते तत्र देवः सहायकृत्।

**शिक्षण-सङ्केतः**
पाठे समागतानां सुभाषितानां गायनं कारयत तथा भावार्थं बोधयत।

**एतदपि जानीत-**
'वाल्मीकि पुरस्कार' संस्कृत साहित्य में विशिष्ट योगदान हेतु दिया जाता है।

# अष्टमः पाठः शङ्कराचार्यः



केरलराज्यस्य पूर्णानदीतीरे कालडीनामकः एकः ग्रामः अस्ति । अत्रैव आद्यजगद्गुरुशङ्कराचार्यः 788 ईशवी जन्म अलभत । अस्य पिता शिवगुरुः आसीत्, माता आर्याम्बा च आसीत् । शङ्करस्य पिता बाल्यकाले एव दिवंगतः । अस्य पालनं माता एव अकरोत् । आचार्यशङ्करः बाल्यकालात् एव अलौकिक प्रतिभासम्पन्नः अत्यन्तं बुद्धिमान् च आसीत् । यथाकालम् उपनीतः शङ्करः मनसा वाचा कर्मणा च विरक्तः एकदा संन्यासाय मातरं न्यवेदयत्। माता पुत्रस्य निवेदनं न स्वीकृतवती।

एकस्मिन् दिने स्नानाय नदीं गतः शङ्करः नक्रेण गृहीतः उच्चैः आक्रोशत् । शङ्करः मातरम् अवदत् - ''अम्ब ! संन्यास-ग्रहणाय माम् अनुमंस्यसे तर्हि अहं नक्रात् मुक्तः भविष्यामि'' इति । मनसा अनिच्छन्ती अपि विवशा माता कष्टेन अकथयत् - ''वत्स ! यथा तुभ्यं रोचते तथा कुरु'' इति । सद्यः नक्रात् मुक्तः शङ्करः मातरं प्रणम्य उक्तवान् - ''मातः ! तव स्मरणक्षणे एव त्वत्समीपम् आगमिष्यामि' ' इति । माता च तम् अनुगृहीतवती ।



संन्यासाय अनुमतिं लब्ध्वा शङ्करः गृहात् निरगच्छत्। अष्टवर्षीयः शङ्करः संन्यासं गृहीत्वा आं◌ेकारेश्वर-क्षेत्रे आचार्य-गोविन्दपादस्य सान्निध्ये ज्ञानं प्राप्तवान् । द्वादशवर्शीयः शङ्करः परिव्राजकैः सह देशात् देशं पर्यटन् काशीं प्राप्तवान् । षोडशवर्षस्य अल्पवयसि एव आचार्य

शङ्करः ब्रह्मसूत्रस्य भाष्यं लिखितवान्। तदनन्तरम् उपनिषदादि प्रमुखग्रन्थानाम् अपि भाष्याणि विरचितवान् ।

शङ्कराचार्यकृतानि अतीव सरलानि सस्वरगेयानि स्तोत्रकाव्यानि अपि अनेकानि सन्ति । आचार्य शङ्करः आसेतुहिमालयं सनातनधर्मस्य प्रचारम् अकरोत्। अस्य प्रमुखः सिद्धान्तः ‘‘अद्वैतवादः’’ अस्ति। धर्मरक्षायै श्रीशङ्करः चतुरः मठान् संस्थापयत् । एते मठाः द्वारकायां बदर्याश्रमे जगन्नाथपुर्यां शृङ्गेर्यां च सन्ति । तेषाम् अधिष्ठातारः अद्यापि शङ्कराचार्याः कथ्यन्ते ।
अन्तकाले मात्रा स्मृतः शङ्करः पूर्वप्रतिज्ञानुसारं तत्समीपम् अगच्छत् । मातुः मरणानन्तरं तस्याः औध्र्वदैहिकं कर्तव्यं सर्वं परिसमाप्य परिभ्रमन् द्वात्रिंशे वयसि ब्रह्मभावम् उपगतः।

**शब्दार्थाः**

दिवंगतः = मृत्यु हो गयी। यथाकालम् = उचित समय पर । उपनीतः = यज्ञोपवीत संस्कार हो जाने पर। विरक्तः = संासारिक वस्तुओं से लगाव न रखने वाला । नक्रेण = मगरमच्छ द्वारा । गृहीतः = पकड़ लिया गया । तर्हि = तब, तो । अनिच्छन्ती = न चाहती हुई । मुक्तः भविष्यामि = छुटकारा पाऊँगा। स्मरणक्षणे = याद करने के समय । परिव्राजकैः सह = संन्यासियों के साथ । औध्र्वदैहिकम् = मरने के बाद किये जाने वाले कर्मकाण्ड। परिसमाप्य = समाप्त करके। द्वात्रिंषे वयसि = बत्तीसवें वर्ष में ।

**अभ्यासः**

**1. उच्चारणं कुरुत-**

आद्यगुरुशङ्कराचार्यः आर्याम्बा आक्रोशत् परिव्राजकैः अद्वैतवादः औध्र्वदैहिकम्

**2. यथायोग्यं योजयत-**

मातरम् अलिखत्
भाष्यम् अगच्छत्
ज्ञानम् अकरोत्
प्रचारम् अलभत
जन्म प्राप्नोत्
नदीम् अवदत्

**3. एकपदेन उत्तरत-**

(क) कालडीग्रामः कस्मिन् राज्ये अस्ति ?
(ख) शङ्करस्य पिता कदा मृतः ?

(ग) माता पुत्रं केन गृहीतम् अपश्यत् ।
(घ) मातुः स्मरणसमये कः आगमिष्यति ?

**4. सन्धि-विच्छेदं कृत्वा सन्धि-नाम लिखत-**
**पदम् सन्धि-विच्छेदः सन्धि-नाम**
यथा- शङ्कराचार्याः शङ्कर +आचार्याः दीर्घ-सन्धिः
ओंकारेश्वरम् ............................... ................................
प्रतिज्ञानुसारम् ............................... ................................
सर्वोदयः ............................... ................................

**5. लकारपरिवर्तनं कुरुत-**
**क्रियापदम् लङ् लकारः**
यथा- गच्छति - अगच्छत्
करोति - .................
कथयति - .................
लिखति - .................

**6. संस्कृतभाषायाम् अनुवादं कुरुत-**
(क) शङ्कराचार्य की माता आर्याम्बा और पिता शिवगुरु थे।
(ख) शङ्कराचार्य को मगर ने पकड़ लिया।
(ग) बहुत से लोग शङ्कराचार्य के शिष्य हुए।
(घ) शङ्कराचार्य ने चार मठों की स्थापना की।

**7. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**
(क) शङ्करस्य पितुःनाम शिवगुरुः आसीत्।
(ख) आचार्यशङ्करः बाल्यकालादेव प्रतिभासम्पन्नः आसीत्।
(ग) मातुः अनुमतिं लब्ध्वा शङ्करः गृहात् निरगच्छत्।
(घ) शङ्करस्य प्रमुखः सिद्धान्तः अद्वैतवादः अस्ति।

**शिक्षण-सङ्केतः**
कस्यापि महापुरुषस्य जीवनचरितं दशवाक्येषु लेखयत।

**एतदपि जानीत-**

**भारतीय संस्कृति में चार आश्रम माने गये हैं-**

1. ब्रह्मचर्याश्रम।
2. गृहस्थाश्रम।
3. वानप्रस्थाश्रम।
4. संन्यासाश्रम।

**गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।**

# नवमः पाठः नीलशृगालः

कस्मिंश्चिद् अरण्ये एकः शृगालः प्रतिवसति स्म। स एकदा स्वेच्छया नगरोपान्ते भ्राम्यन् कुक्कुरेभ्यो भीतः रजकस्य नीलभाण्डे पतितः। ततोऽसौ वनं गत्वा आत्मानं नीलवर्णमवलोक्य अचिन्तयत्- अहम् इदानीम् उत्तमवर्णः, तदाहं स्वकीयोत्कर्षं किं न साधयामि? इत्यालोच्य शृगालान् आहूय स उक्तवान्-'मां भगवती वनदेवता स्वहस्तेन अरण्यराज्ये अभिषिक्तवती। तदद्यारभ्य अरण्ये अस्मदाज्ञया व्यवहारः कार्यः। शृगालाश्च तं विशिष्टवर्णम् अवलोक्य प्रणम्य अवदन्- 'यथा आज्ञापयति देव! इत्यनेनैव सर्वे क्रमेण



अरण्यवासिनः तस्य आधिपत्यं स्वीकृतवन्तः।



शनैः शनैः स व्याघ्र-सिंहादीन् उत्तमजनान् प्राप्य स्वजातीयान् दूरीकृतवान्। ततो दुःखितान् शृगालान् अवलोक्य केनचिद् वृद्धशृगालेन एतत्प्रतिज्ञातम्- यथा अयं व्याघ्रादिभिः परिचितो भवेत् तथा उपायं करिष्यामः। यतः एते व्याघ्रादयः अस्य वर्णमात्रेण विप्रलब्धाः सन्तः एनं शृगालम् अज्ञात्वा राजानं मन्यन्ते। ततः सायंकाले सर्वे तत्र सम्मिल्य एकदैव महारावम् अकुर्वन्। तं शब्दं श्रुत्वा स नीलशृगालोऽपि जातिस्वभावात् तैः सह शब्दम् अकरोत्। तथा कृते सति सिंहैः स ज्ञातः हतश्च। यतः-

**यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः।**
**श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम्।।**

**(हितोपदेशे)**

**शब्दार्थाः**

कस्मिंश्चिद् = किसी। अरण्ये = जंगल में। भ्राम्यन् = घूमता हुआ। भीतः = डरा हुआ। रजकस्य = कपड़ा धोने वाले के। नीलभाण्डे = नील के हौज (नाद) में। नगरोपान्ते = शहर के समीप। आत्मानम् = अपने शरीर को। उत्तमवर्णः = अच्छे रंग का। स्वकीयोत्कर्षम् = अपनी उन्नति (लाभ) को। साधयामि = सिद्ध करूँ। आलोच्य = विचार करके। आहूय = बुलाकर। अभिषिक्तवती = अभिषेक किया है। आधिपत्यम् = अधीनता। शनैः-शनैः = धीरे

धीरे । केनचिद् = किसी के द्वारा। यतः = क्योंकि। विप्रलब्धाः = ठगे गये (वंचित)। सम्मिल्य = मिलकर। एकदैव = एक साथ। महारावम् = ऊँची आवाज। शब्दम् = आवाज। दुरतिक्रमः = दुर्निवार, जिसका निवारण कठिन हो। श्वा = कुत्ता। न अश्नाति = नहीं खाता है। उपानहम् = जूते को।

श्लोकार्थ-जिसका जो स्वभाव होता है, उसका निवारण कठिन है। यदि कुत्ते को राजा बना दिया जाय तो क्या वह जूते नहीं चाटेगा?

**अभ्यासः**

**1. उच्चारणं कुरुत-**

कस्मिंश्चिद् स्वेच्छया कुक्कुरेभ्यः

स्वकीयोत्कर्षम् अभिषिक्तवती अस्मदाज्ञया

व्याघ्रादिभिः सम्मिल्य यस्यास्ति

नाश्नात्युपानहम् इत्यनेनैव व्याघ्रादयः

**2. एकपदेन उत्तरत-**

(क) शृगालः कुत्र वसति स्म?

(ख) तस्य आधिपत्यं के स्वीकृतवन्तः?

(ग) सर्वे शृगालाः सायंकाले किम् अकुर्वन्?

(घ) सिहः कं हतवान् ?

**3. एकवाक्येन उत्तरत-**

(क) नीलवर्णः शृगालः किम् अचिन्तयत् ?

(ख) वृद्धश्शृगालेन किं प्रतिज्ञातम् ?

(ग) नीलवर्णः शृगालः किम् उक्तवान् ?

**4. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-**

**पतितः श्रृगालः दुरतिक्रमः वनदेवता**

(क) कर्स्ि‍मश्चिद् अरण्ये एकः .............................. वसति स्म।

(ख) स रजकस्य नीलभाण्डे ..................................।

(ग) भगवती ........................... स्वहस्तेन अरण्यराज्ये अभिषिक्तवती।

(घ) य स्वभावो हि यस्यास्ति स नित्यम् ...................................।

**5. निम्नलिखित-शब्दरूपाणि पूरयत-**

**विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्**

प्रथमा देवः ................ देवाः

द्वितीया शृगालम् शृगालौ .................
तृतीया ................. कालाभ्याम् कालैः
चतुर्थी बालाय ................. बालेभ्यः
पञ्चमी व्याघ्रात् व्याघ्राभ्याम् .................
षष्ठी ................. सिंहयोः सिंहानाम्
सप्तमी भाण्डे ................. भाण्डेषु

**शिक्षण-सङ्केतः**

1. हिन्दीभाषायाम् अस्याः कथायाः अनुवादं कारयत।
2. श्लोकानाम् अभ्यासं कारयत तथा तेषाम् अर्थं लेखयत।
3. पाठसदृशीम् अन्यां कथां श्रावयत।

# दशमः पाठः प्रहेलिकाः

वने वसति को वीरो योऽस्थि-मांस-विवर्जितः।
असिवत् कुरुते कार्यं कार्यं कृत्वा वनं गतः।।1।।
न तस्यादिः न तस्यान्तः मध्ये यः तस्य तिष्ठति।
तवाप्यस्ति ममाप्यस्ति यदि जानासि तद् वद।।2।।
एकचक्षुर्न काकोऽयं बिलमिच्छन् न पन्नगः।
क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः।।3।।
प्रकाशः शीतलः यस्य यः कलाभिः च वर्धते।
तापं हरति सर्वेषां चकोरस्य प्रियः स कः।।4।।
वृक्षाग्रवासी न च पक्षिराजः
त्रिनेत्रधारी न च शूलपाणिः।
त्वग्वस्त्रधारी न च सिद्धयोगी
जलं च बिभ्रन्न घटो न मेघः।। 5 ।।

3 सूचिका-तन्तुः (सूई-डोरा)
2 नयनम् (नयन)
1 कुम्भकारस्य तन्तु (कुम्भकार का डोरा)
5 नारिकेलः (नारियल)
4 चन्द्रः (चन्द्रमा)

**शब्दार्थाः**

वने = जंगल में, जल में। अस्थि = हड्डी। असिवत् = तलवार की भाँति। न = न अक्षर। तस्य = उस पद के। आदिः = आरम्भ में। नः = न अक्षर। तस्यान्तः = उसके अन्त में। मध्ये = बीच में। तव अपि अस्ति = तुम्हारे पास भी है। एकचक्षुः = एक आँख वाला। पन्नगः = साँप। क्षीयते = घटता है। कलाभिः च वर्धते = कलाओं से बढ़ता है। चकोरस्य = चकोर का। सः कः? = वह कौन है ? वृक्षाग्रवासी = वृक्ष के अगले हिस्से पर रहता है। पक्षिराजः = पक्षियों का राजा। त्रिनेत्रधारी = तीन आँखों वाला। शूलपाणिः = भगवान शङ्कर। त्वग्-वस्त्रधारी = छाल, (वल्कल) वस्त्र वाला। बिभ्रन् = भरा हुआ। न घटः = (वह) घड़ा नहीं है। न मेघः = (वह) बादल नहीं है।

**अन्वयः**

(1) कः वीरः वने वसति, यः अस्थि-मांस-विवर्जितः (अस्ति) असिवत् कार्यं कुरुते, कार्यं कृत्वा वनं गतः।

(2) तस्य आदिः 'न' (वर्णः) तस्यान्तः 'न' (वर्णः) तस्य मध्ये 'य' (वर्णः) तिष्ठति। तव अपि अस्ति, मम अपि
अस्ति, यदि जानासि तद् वद।
(3) एकचक्षुः (अस्ति परन्तु) अयं न काकः, बिलम् इच्छन् न पन्नगः, य क्षीयते वर्धते च एव (परन्तु सः) न समुद्रः
चन्द्रमा अस्ति।
(4) यस्य प्रकाशः शीतलः (अस्ति), यः कलाभिः च वर्धते। सर्वेषां तापं हरति, यः चकोरस्य प्रियः (अस्ति), सः
कः अस्ति ?
(5) वृक्षाग्रवासी (अस्ति), न च पक्षिराजः। त्रिनेत्रधारी (अस्ति परं) न च शूलपाणिः। त्वग्वस्त्रधारी (अस्ति परं)
न च सिद्धयोगी (अस्ति)। जलं च बिभ्रन् (अस्ति परं) न घटः न वा मेघः अस्ति।

## अभ्यासः

**1. उच्चारणं कुरुत -**
योऽस्थि विवर्जितः तवाप्यस्ति
ममाप्यस्ति एकचक्षुर्न बिलमिच्छन्
वृक्षाग्रवासी त्वग्वस्त्रधारी बिभ्रन्न

**2. एकपदेन उत्तरत -**
(क) कः वीरः असिवत् कार्यं करोति ?
(ख) यस्य आदौ 'न' अस्ति तथा अन्ते 'न' अस्ति एवं मध्ये 'य' अस्ति, सः कः अस्ति?
(ग) यस्य प्रकाशः शीतलः अस्ति तथा च कलाभिः वर्धते, सः कः अस्ति?
(घ) कः वृक्षाग्रवासी अस्ति परं पक्षिराजः नास्ति?

**3. मञ्जूषातः समानार्थक-पदानि चित्वा लिखत-**
**नीरम् जलधिः शशिः घनः नेत्रम्**
यथा- समुद्रः - जलधिः
चन्द्रः - ..................
मेघः - ..................
जलम् - ..................
चक्षुः - ..................

**4. विलोमपदानि परस्परं योजयत-**
वीरः आगतः
गतः तप्तः
प्रकाशः अप्रियः
शीतलः कायरः
प्रियः अन्धकारः

**5. सन्धि-विच्छेदं कुरुत -**
**पदम् सन्धि-विच्छेदः**
तस्यान्तः .......................................
चैव ........................................
वृक्षाग्रवासी ........................................

**शिक्षण-सङ्केतः**
(क) छात्रैः समानार्थकानाम् अन्यहिन्दी-प्रहेलिकानां संग्रहं कारयत।
(ख) प्रहेलिकानां हिन्दीभाषायाम् अनुवादं कारयत तथा तासाम् उपयोगितां बोधयत।

**मनोरञ्जनाय**

**हास्यं सुद्ध्युपास्यम् (चुटकुला)**

एकः शिक्षकः पत्रं लिखित्वा कस्यचिद् छात्रस्य गृहम् अप्रेषयत् छात्रस्य च पितरं प्रतिवेदनम् अकरोत्। अन्येद्युः पिता आगत्य अध्यापकम् अपृच्छत्-किमेतत्पत्रं भवतैव लिखितम्?
अध्यापकः- आम्। पिता-तर्हि अस्मिन् पत्रे किं लिखितम्, पठित्वा कथयतु।
अस्पष्टलिपिकारणात् अध्यापकः अतीव कठिनतया पत्रम् अपठत् अवदत् च-अस्मिन् पत्रे भवते इदमेव प्रतिवेदितं यत् भवतः बालस्य लिपिः समीचीना नास्ति।
भावार्थ- एक अध्यापक ने किसी लड़के के घर पर पत्र लिखकर भेजा और लड़के के पिता से शिकायत की। दूसरे दिन पिता ने अध्यापक से पूछा - क्या यह पत्र आपने ही लिखा है ? अध्यापक- हाँ। पिता- तो इस पत्र में पढ़कर तो बताइए क्या लिखा है? लिखावट ठीक नहीं थी, अतः अध्यापक ने बड़ी मुश्किल से पढ़ा और कहा कि इस पत्र में आपको यही शिकायत लिखकर भेजी गयी है कि आपके लड़के की लिखावट बहुत खराब है।

# एकादशः पाठः गणतन्त्रदिवस-समारोहः

**(लृट्लकार-प्रयोगाः)**



प्रभाकरः- वयस्य जैकब! श्वः गणतन्त्रदिवसस्य समारोहः भविष्यति। तस्य दर्शनाय वयं गमिष्यामः। सलीमः ह्यः माम् अवदत् यत् सः अपि तत्र गमिष्यति। किं त्वमपि तत्र चलिष्यसि?
जैकबः- मित्र! गणतन्त्रदिवसस्य समारोहः किमर्थं भवति?

प्रभाकरः- अहो! किं त्वं न जानासि यत् प्रथमगणतन्त्रदिवसाद् एव स्वतन्त्रभारतस्य स्वकीयं नवीनं संविधानम् आरब्धमासीत्।
जैकबः- गणतन्त्रदिवसस्य आरम्भः कदा अभवत्?
प्रभाकरः- अद्यैव तु अस्माकम् अध्यापकः गणतन्त्रविषये अवदत् यत् 26-1-1950 ईसवीये वर्षे प्रथम-गणतन्त्रदिवसस्य समारोहः अभवत्।
जैकबः- अयं समारोहः कुत्र भविष्यति, तथा च तत्र किं भविष्यति ?
प्रभाकरः- अयं समारोहः सम्पूर्णे देशे आयोजितो भविष्यति। विद्यालयेषु, यन्त्रालयेषु, कार्यालयेषु च ध्वजारोहणं भवति। विद्यालयेषु बालकाः क्रीडाङ्गणेषु सोत्साहं खेलिष्यन्ति। ततः शिक्षकाः सर्वेभ्यः मोदकं वितरिष्यन्ति।
जैकबः- भारतस्य राजधान्यां दिल्लीनगर्यां श्वः किं किं भविष्यति?
प्रभाकरः- तत्र भारतद्वारस्य एकस्मिन् स्थाने राष्ट्रपतिः स्थित्वा राष्ट्रं सम्बोधयिष्यति। तदनन्तरं भारतीय-सैनिकाः विभिन्नेषु समूहेषु तस्य सम्मुखम् आगत्य तस्याभिनन्दनं करिष्यन्ति।
जैकबः- गणतन्त्रदिवस-समारोहे अन्यत् किं किं भविष्यति?
प्रभाकरः- विभिन्नेभ्यः राज्येभ्यः जनाः अस्य समारोहस्य दर्शनाय तत्र गमिष्यन्ति। स्व-स्वराज्यस्य कलाकृतीरपि प्रदर्शयितुं तत्र नेष्यन्ति।
जैकबः- किं दिल्लीवासिनः एव भारतद्वारं गमिष्यन्ति?
प्रभाकरः- नैव, नैव, सर्वेऽपि भारतीयाः सम्मिलिताः भवितुं शक्नुवन्ति। एषः समारोहः सम्पूर्णस्य राष्ट्रस्यास्ति।
जैकबः- तर्हि अहमपि तत्र सम्मिलितः भविष्यामि। स्वमित्रं हमीदमपि तत्र नेष्यामि।
प्रभाकरः- शोभनम्, अतिशोभनम्।

## शब्दार्थाः

वयस्य=मित्र। श्वः=कल (आने वाला)। ह्यः=कल(बीता हुआ)। स्वकीयम्=अपना। आरब्धम् = प्रारम्भ हुआ। अद्यैव=आज ही। कुत्र=कहाँ। भविष्यति=होगा। यन्त्रालयेषु=कारखानों में। क्रीडाङ्गणेषु=खेल के मैदान में। भारतद्वारस्य=भारतद्वार(इंडिया गेट) के। सम्बोधयिष्यति=सम्बोधित करेंगे। शोभनम्=सुन्दर।

## अभ्यासः

**1. उच्चारणं कुरुत -**
आरब्धमासीत् अद्यैव
तस्याभिनन्दनम् कलाकृतीरपि

**2. एकपदेन उत्तरत -**
(क) गणतन्त्रदिवसे समारोहः कदा भवति ?
(ख) गणतन्त्रदिवसे कः राष्ट्रं सम्बोधयति ?
(ग) अस्माकं देशस्य राजधानी का अस्ति ?

**3. एकवाक्येन उत्तरत -**
(क) गणतन्त्रदिवसस्य समारोहः किमर्थं भवति ?
(ख) गणतन्त्र-दिवससमारोहस्य आरम्भः कदा अभवत् ?
(ग) गणतन्त्र-दिवसे किं किं भवति ?

**4. मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत-**
**श्वः ह्यः अधुना अद्य**
(क) अहम् ...................... गीताम् अपठम्।
(ख) त्वम् ...................... कुत्र गमिष्यसि ?
(ग) .................... गणतन्त्र-दिवसस्य उत्सवः अस्ति।
(घ) ....................... देशः स्वतन्त्रः अस्ति।

**विशेषः**
भविष्यत् काल की क्रिया बनाने के लिए धातु के ‘लृट्’ लकार के रूपों का प्रयोग किया जाता है,
**एकवचनम् द्विवचनम् बहुवचनम्**

**जैसे.** सः गमिष्यति तौ गमिष्यतः ते गमिष्यन्ति
(वह जायेगा) (वे दोनों जायेंगे) (वे सब जायेंगे)
त्वं गमिष्यसि युवां गमिष्यथः यूयं गमिष्यथ
(तुम जाओगे) (तुम दोनों जाओगे) (तुम सब जाओगे)
अहं गमिष्यामि आवां गमिष्यावः वयं गमिष्यामः
(मैं जाऊँगा) (हम दोनों जायेंगे) (हम सब जायेंगे)
ऊपर ध्यान से देखें तो ज्ञात होता है कि 'गम्' धातु के लृट् लकार के प्रथम पुरुष के एकवचन, द्विवचन और बहुवचन में क्रमशः गम्-इष्यति=गमिष्यति, गम्-इष्यतः=गमिष्यतः, गम्-इष्यन्ति=गमिष्यन्ति आदि प्रत्ययों को जोड़ते हैं। इसी प्रकार मध्यम तथा उत्तम पुरुष के रूप में भी अन्य प्रत्यय जुड़ते हैं, यथा-
**एकवचनम् द्विवचनम् बहुवचनम्**
गम्-इष्यसि=गमिष्यसि गम्-इष्यथः=गमिष्यथः गम्-इष्यथ=गमिष्यथ
**एकवचनम् द्विवचनम् बहुवचनम्**
गम्-इष्यामि=गमिष्यामि गम्-इष्यावः=गमिष्यावः गम्-इष्यामः=गमिष्यामः

**5. अधोलिखित क्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत-**
**क्रियापदम् धातुः लकारः पुरुषः वचनम्**
**यथा-** गमिष्यति गम् लृट्लकारः प्रथम-पुरुषः एकवचनम्
भविष्यति ...... ................. ............ ................
पठिष्यति ...... ................. ............ ................
नेष्यन्ति ...... ................. ............ ...............
चलिष्यथ ...... ................. ............ ...............

**6. चित्र-निर्माणं कुरुत -**
राष्ट्रियध्वजः, राष्ट्रियपक्षी, राष्ट्रियपुष्पम्।
**शिक्षण-सङ्केतः-**
बालकैः भू-वद्-हस्-धातूनां लृट्लकारस्य (भविष्यत्-कालस्य) त्रिषु पुरुषेषु त्रिषु वचनेषु च रूपाणाम् अभ्यासं कारयत।
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।**

# द्वादशः पाठः चन्द्रशेखरः आजादः



"तव किं नाम अस्ति?"
"आजादः।"
"कस्तव पिता?"
"स्वाभिमानः।"
"क्व निवासस्थानम्?"
'कारागारः'। न्यायाधीशस्य प्रश्नानाम् एतादृशानि उत्तराणि भारतस्य परतन्त्रताकाले यः अयच्छत् सः आसीत् चन्द्रशेखरः 'आजादः'।

संस्कृतस्य एव छात्रः, नाम्ना चन्द्रशेखरः तदानीं वाराणस्यां पठति स्म। एकादशवर्षदेशीयः अयं यदा 'जलियावाला'- काण्डस्य नृशंसताम् अशृणोत् तदा एव सः प्रतिज्ञाम् अकरोत् 'येन केनापि प्रकारेण इदं क्रूरशासनम् उन्मूलनीयम्' इति।

शीघ्रमेव सः कालः आगतः। भारते ब्रिटिशयुवराजः आगच्छत्। शासनेन तस्य सत्काराय यद् आयोजनं कृतं तस्य बहिष्काराय भारतीयाः जनाः निश्चयम् अकुर्वन्। वाराणस्यां क्वींसकालेज इति नाम्ना ख्यातस्य संस्कृतविद्यालयस्य प्राङ्गणे आजादः बहिष्कारान्दोलनं समचालयत्। तदा अल्पवयस्कमपि एतं राजपुरुषाः कारागारे अपातयन्। कतिपयदिनानन्तरं च तं न्यायालयम् आनयन्। न्यायाधीशः तं प´चदशवर्षीयं बालकं तथाविधोत्तरदानेन उद्दण्डं ज्ञात्वा क्रूरतया दण्डितवान्- "प´चदशवारं वेत्रदण्डेन ताडयित्वा कारागारात् निष्कासय इति।"

वेत्रप्रहारकः तं निर्वस्त्रं कृत्वा तस्य पृष्ठदेशं तथा निर्दयम् प्रहृतवान् यथा तस्य पृष्ठचर्म उच्छिन्नम् अभवत्। सः प्रतिवेत्रघातं 'भारत-माता जयतु' इति नादं तावद् अकरोत् यावत् किल सः मूर्च्छितः नाभवत्।

साइमन-समितेः बहिष्कारकाले वयोवृद्धं लालालाजपतरायं गौराङ्गाः तथा अताडयन् यथा स कतिपयैरेव दिनैः प´चत्वम् अगच्छत्। तस्य प्रतिशोधाय प्रवृत्ताः आजादः, भगतसिंहः, शिवरामः, राजगुरुः, जयगोपालश्च-इमे सर्वे लालालाजपतरायस्य मृत्योः मुख्यं कारणं गौराङ्गं सैन्डर्स-नामानम् अमारयन्।

आजादः 1931 तमे वर्षे फरवरी मासस्य सप्तविंशे दिनाङ्के पूर्वाह्णे दशवादनसमये प्रयागस्य अल्फ्रेड-वाटिकायां सुखदेवराजेन सह उपविष्टः आसीत्। तदा नाट-बावरेण सह अन्ये राजपुरुषाः तं सर्वतः सहसा आक्रामन्। नाट-बावरस्य भुशुण्डीगुटिका आजादस्य जङ्घायां प्रविष्टा। आजाद-प्रक्षिप्ता च गुटिका बावरस्य हस्तं भित्वा बहिर्गता। घटिकैकं यावद् उभयतः गुटिकावृष्टिः अभवत्। एकतः एकः आजादः अन्यतः च बहवः शत्रवः। यदा गुटिकाः समाप्तप्रायाः अभवन् तदा आजादः अन्तिमया गुटिकया आत्मानं हत्वा स्वकीयम् 'आजाद' इति नाम सार्थकम् अकरोत्। एव´च सः स्वातन्त्रययज्ञकुण्डे स्वप्राणानाम् आहुतिं कृत्वा वीरगतिं प्राप्नोत्।

**शब्दार्थाः**

अयच्छत्=दिया। तदानीम्=उस समय। एकादशवर्षदेशीयः=लगभग ग्यारह वर्ष का। नृशंसताम्=क्रूरता को (निर्दयता को)। उन्मूलनीयम्=जड़ से उखाड़ देना चाहिए। समचालयत्=स´चालित किया। अल्पवयस्कः=कम उम्र के। कारागारे=जेल में। वेत्रदण्डेन=बेंत के डण्डे से। तथाविध=उस प्रकार के। वेत्रप्रहारकः=बेंत से प्रहार करने वाला। घटिका=घण्टा। तावत्=तब तक। प´चत्वम्=मृत्यु को। गौराङ्गः=अंग्रेज। सप्तविंशे दिनाङ्के=सत्ताईसवीं तारीख में। भुशुण्डीगुटिका=बन्दूक की गोली।

**अभ्यासः**

1. उच्चारणं कुरुत-

एकादशवर्षदेशीयः कतिपयदिनान्तरम् अल्पवयस्कमपि

स्वातन्त्र्ययज्ञकुण्डे बहिष्कारान्दोलनम् गुटिकावृष्टिः

2. एकपदेन उत्तरत-

(क) आजादस्य पूर्णं नाम किम् ?

(ख) कस्य स्वागतस्य बहिष्काराय जनाः निश्चयम् अकुर्वन् ?

(ग) वेत्रप्रहारकाले आजादः किम् उद्घोषयत् ?

(घ) अल्फ्रेड-वाटिका कस्मिन् नगरे अस्ति ?

3. एकवाक्येन उत्तरत-

(क) कदा वयोवृद्धं लालालाजपतरायं गौराङ्गाः अताडयन् ?

(ख) कस्य प्राङ्गणे आजादः बहिष्कारान्दोलनं समचालयत् ?

(ग) लालालाजपतरायस्य मृत्योः मुख्यं कारणं सैन्डर्स-नामानम् गौराङ्गं के अमारयन् ?

(घ) 'कस्तव पिता ?' इति प्रश्नस्य उत्तरं किम् अयच्छत् ?

4. अधोलिखित-क्रियापदानां लकारं, पुरुषं, वचनं च लिखत-

क्रियापदम् लकारः पुरुषः वचनम् यथा- पठन्ति लट् प्रथम पु0 बहुवचनम्

आसीत् ........... .............. ...................

आगच्छत् ........... .............. ...................
अभवत् ........... .............. ...................
अकरोत् ........... .............. ...................
प्राप्नोत् ........... .............. ...................

5. वद्-पठ्-क्रीड्-धातूनां लङ्लकारस्य रूपाणि लिखत-

6. संस्कृतभाषायाम् अनुवादं कुरुत-

(क) विद्यालय में स्वतंत्रता दिवस पन्द्रह अगस्त को मनाया जाता है।
(ख) स्वतंत्रता संग्राम में अनेक राष्ट्रभक्तांे ने प्राणों की आहुति दी।
(ग) चन्द्रशेखर आजाद संस्कृत विषय के छात्र थे।
(घ) हमारा देश पन्द्रह अगस्त सन् 1947 ई0 को स्वतंत्र हुआ।
(ङ) देश में संविधान 26 जनवरी सन् 1950 ई0 को लागू किया गया।

7. सुमेलनं कुरुत-

(क) गणतंत्र दिवसः दिसम्बर-मासस्य सप्त-दिनाङ्के
(ख) स्वतंत्रता दिवसः जनवरी-मासस्य षड्विंश-दिनाङ्के
(ग) महात्मागान्धी जन्मदिवसः अगस्त-मासस्य पञ्चदश-दिनाङ्के
(घ) झण्डा-दिवसः अक्टूबर-मासस्य द्वितीये-दिनाङ्के

8. हिन्दीभाषायाम् अनुवादं कुरुत-

(क) चन्द्रशेखरः तदानीं वाराणस्यां पठति स्म।
(ख) आजादः प्रयागस्य अल्फ्रेड-वाटिकायां सुखदेवराजेन सह उपविष्टः आसीत्।
(ग) सः प्रतिवेत्रघातं 'भारत-माता जयतु' इति नादम् अकरोत्।
(घ) आजादः स्वातन्त्र्ययज्ञकुण्डे स्वप्राणानाम् आहुतिं कृत्वा वीरगतिं प्राप्नोत्।

शिक्षण-सङ्केतः

देशभक्तानां सत्प्रयासेनैव अस्माकं देशः स्वतन्त्रः जातः। कक्षायाम् अस्य विस्तृतं ज्ञानं ददतु।
यशः पुण्यैरवाप्यते।

# त्रयोदशः पाठः काकः



एकः काकः तृषापीडितः
जलं नालभत दूरे दूरे ।
वृक्षाद् वृक्षं गतः वराकः
ग्रामे ग्रामे नगरे नगरे ।। 1 ।।
एकं सहसा घटं दृष्टवान्
घटे जलं दृष्टं बहुदूरे ।
खण्डं खण्डं पाषाणानां
क्षिप्तवान् काकः जलमध्ये ।।2।।
घटकण्ठं सम्प्राप्तं नीरं
पीत्वा सन्तुष्टः खलु काकः ।
बुद्धिपूर्वकं यत्नं कुरुते
वद न सफलतां लभते का? कः? ।।3।।

**शब्दार्थाः**

काकः=कौआ। तृषापीडितः=प्यास से व्याकुल। न अलभत=नहीं पाया। वृक्षात्=वृक्ष से (पेड़ से)। वराकः=बेचारा। सहसा=अचानक (एकाएक)। खण्डम्=टुकड़ा। पाषाणानाम्=पत्थरों के। क्षिप्तवान्=डाला। दृष्टवान्=देखा। का=कौन (स्त्री)। कः=कौन (पुरुष)।

अन्वयः

(1) एकः तृषापीडितः काकः दूरे-दूरे जलं न अलभत।
(सः) वराकः वृक्षाद् वृक्षं गतः, ग्रामे ग्रामे नगरे नगरे (गतः)।
(2) (सः) सहसा एकं घटं दृष्टवान्। घटे जलं बहुदूरे दृष्टम्।
काकः पाषाणानां खण्डं खण्डं जलमध्ये क्षिप्तवान्।
(3) नीरं घटकण्ठं सम्प्राप्तम्। काकः (तत्) पीत्वा सन्तुष्टः।
बुद्धिपूर्वकं यत्नं कुरुते का कः सफलतां न लभते?

अभ्यासः

1. उच्चारणं कुरुत-

तृषापीडितः वृक्षाद् पाषाणानाम्

दृष्टवान् क्षिप्तवान् सन्तुष्टः

सम्प्राप्तम् बुद्धिपूर्वकम् नालभत

2. एकपदेन उत्तरत-

(क) तृषापीडितः कः आसीत्?

(ख) सः दूरे दूरे किं न अलभत?

(ग) वृक्षात् वृक्षं कः गतवान्?

(घ) घटे बहुदूरे किं दृष्टम्?

(ङ) काकः पाषाणखण्डान् कुत्र अक्षिपत्?

3. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-

एकः, नालभत दृष्टम् अक्षिपत् घटम् जलम्।

(क) ................................काकः तृषापीडितः।

(ख) जलं दूरे दूरे.................................. ।

(ग) एकं सहसा................................ दृष्टवान् ।

(घ) घटे जलं बहुदूरे .................................. ।

(ङ) स काकः जलमध्ये पाषाणखण्डम् ............................. ।

(च) काकः ........................ पीत्वा सन्तुष्टः जातः।

4. संस्कृते अनुवादं कुरुत-

(क) एक कौआ प्यास से व्याकुल था।

(ख) वह जल के लिए वृक्ष से वृक्ष पर गया।

(ग) सहसा उसे एक घड़ा दिखायी पड़ा।

(घ) घड़े में पानी बहुत दूर था।

(ङ) उसने घड़े में पत्थर के टुकड़े डाले।

5. चित्राणि दृष्ट्वा वाक्यानि रचयत-



यथा- एकः मयूरः अस्ति। ....................................... ...................................



 
 

............................... ..................................... ...................................

6. उचितम् उत्तरपदं रेखांकितं कुरुत-

यथा- तृषापीडितः कः आसीत् ? (काकः, वानरः, गजः)।

(क) दूरे दूरे किं नालभत ? (अन्नम्, दुग्धम्, जलम्)।

(ख) वृक्षाद् वृक्षं कः गतः ? (मयूरः, उलूकः, काकः)।

(ग) काकः सहसा किं दृष्टवान् ? (शरावम्, घटम्, कटाहम्)।

(घ) काकः घटे किं क्षिप्तवान् ? (पाषाणखण्डम्, अन्नम्, जलम्)।

7. सप्तमीविभक्तिकपदानि चित्वा लिखत-

यथा- ग्रामे, ...........................................,

...........................................,

शिक्षण-सङ्केतः

श्लोकानां सामूहिकं गायनं कारयत।

# चतुर्दशः पाठः रक्षाबन्धनम्



रक्षाबन्धनं पर्व श्रावणमासस्य पूर्णिमायां तिथौ भवति। अत एव अस्य नाम 'श्रावणी' इत्यपि प्रसिद्धम्। अस्मिन् पर्वणि सर्वे हिन्दुजनाः सप्तर्षीणां पूजनं कुर्वन्ति। गृहेषु च श्रावणीपूजा स्त्रीभिःक्रियते। अस्यां तिथौ भगिन्यः स्वानुजानां अग्रजानाञ्च दक्षिणहस्तेषु रक्षासूत्राणि बध्नन्ति, अत एव अस्योत्सवस्य रक्षाबन्धनम् इति नाम प्रसिद्धम्।



अस्य रक्षाबन्धनस्य अस्माकं समाजे अतिमहत्त्वं विद्यते। अस्मिन् दिने या कापि कन्या यस्य कस्यापि पुरुषस्य हस्ते रक्षासूत्रं बध्नाति, सः पुरुषः सर्वदा तां प्रति भगिनीवद् व्यवहारं धर्मतः करोति।
भारतस्य मध्यकालिके इतिहासे रक्षाबन्धनस्य महत्त्वविषये एकः दृष्टान्तः मिलति। चित्तौडस्य हिन्दूराज्ञी कर्मवती हुमायँूनामकं मुसलमानसम्राजं स्वभ्रातरं मत्वा तस्य पार्श्वे रक्षासूत्रं प्रेषितवती। सः सम्राट् रक्षासूत्रं स्वीकृत्य तस्याः सम्मानरक्षाम् अकरोत्। गुजरातनरेशेन सह युद्धे चित्तौडदेशस्य सहायताम् अकरोत्। एतत् खलु महत्त्वमस्ति रक्षाबन्धनपर्वणि प्रयुक्तस्य रक्षासूत्रस्य।

रक्षाबन्धनदिवसे एव उपाकर्मसंस्कारस्यापि विधानमस्ति। एतदर्थं धार्मिकाः जनाः पुरोहितेन सह नदीतटं पवित्रं सरोवरं वा गच्छन्ति। तत्र आवर्षं कृतानि निषिद्धकार्याणि अनुस्मरन्ति, पुनश्च तानि असत्कार्याणि न भवेयुः इति प्रायश्चित्तं कुर्वन्ति, ओषधीनाम् अनुलेपनं कृत्वा जले बहुवारं स्नानं च कुर्वन्ति। एवमस्य महत्त्वं ज्ञात्वा भारतशासनेन अयं दिवसः 'संस्कृतदिवस' -रूपेणोद्घोषितः अस्ति। यतः संस्कृतं सम्पूर्णं देशं एकतायाः सूत्रे बध्नाति।

**शब्दार्थाः**

पूर्णिमायां तिथौ=पूर्णिमा तिथि को। स्त्रीभिः क्रियते=महिलाओंके द्वारा की जाती है। स्वानुजानाम्=अपने छोटे भाइयों के। अग्रजः=पहले जन्मे हुए। बध्नन्ति=बाँधते हैं। या कापि=जो कोई। यस्य कस्यापि=जिस किसी के। भातृभावस्य=भाई सरीखे भाव का। आवर्षम्=वर्ष भर (पूरे साल)। निषिद्धकार्याणि=न किये जाने वाले कर्मों को

(निषिद्ध=जिनको नहीं किया जाना चाहिए)। अनुस्मरन्ति=याद करते हैं। प्रायश्चित्तम्=किये गये निषिद्ध कर्मों का परिशोधन। अनुलेपनम्=बाद में लेपन करना। असत्कार्याणि=अनुचित कार्य। खलु=निश्चय ही । संस्कृतदिवसरूपेणोद्घोषितः= संस्कृत-दिवस के रूप में घोषित।

**अभ्यासः**

1. उच्चारणं कुरुत-

श्रावणमासस्य सप्तर्षीणाम् उपाकर्मसंस्कारस्यापि

निषिद्धकार्याणि अनुस्मरन्ति उद्घोषितः

2. एकपदेन उत्तरत-

(क) रक्षाबन्धनं पर्व श्रावणमासस्य कस्यां तिथौ भवति?

(ख) श्रावणीपर्वणि हिन्दुजनाः केषां पूजनं कुर्वन्ति?

(ग) भगिन्यः स्वानुजानाम् अग्रजानाञ्च दक्षिणहस्तेषु कानि बध्नन्ति?

(घ) हिन्दूराज्ञी कर्मवती कस्य पाश्र्वे रक्षासूत्रं प्रेषितवती?

3. एकवाक्येन उत्तरत-

(क) हुमायूँ-सम्राट् रक्षासूत्रं स्वीकृत्य किम् अकरोत्?

(ख) रक्षाबन्धन-दिवसे एव कस्य संस्कारस्य विधानमस्ति?

(ग) भारतशासनेन अयं दिवसः केन रूपेणोद्घोषितः?

(घ) रक्षाबन्धनदिवसे कस्याः भाषायाः दिवसो भवति?

4. कोष्ठकात् उचितपदानि चित्वा रिक्तस्थानानि पूरयत-

(क) रक्षाबन्धनं पर्व.................................तिथौ भवति। (पूर्णिमायाम्/एकादश्याम्)

(ख) सर्वे हिन्दुजनाः................................पूजनं कुर्वन्ति। (सप्तर्षीणाम्/जनानाम्)

(ग) गृहेषु श्रावणी पूजा...............................क्रियते। (स्त्रीभिः/पुरुषैः)

(घ) जले बहुवारं...........................कुर्वन्ति। (स्नानम्/तरणम्)

(ङ) इतिहासे एवं विधानि.................................सन्ति। (उदाहरणानि/ज्ञानानि)

5. 'क' स्तम्भम् 'ख' स्तम्भेन योजयत-

'क' 'ख'

(क) संस्कृतं सम्पूर्णं देशम् (क) उपाकर्मसंस्कारस्यापि विधानमस्ति।

(ख) रक्षाबन्धनदिवसे एव (ख) एकतायाः सूत्रे बध्नाति।

(ग) रक्षाबन्धनस्य अस्माकं समाजे (ग) तस्याः सम्मानरक्षामकरोत्।

(घ) सः सम्राट् रक्षासूत्रं स्वीकृत्य (घ) अतिमहत्त्वं विद्यते।

6. सन्धि-विच्छेदं कुरुत-

पदम् सन्धिविच्छेदः

स्वानुजानाम् ............ +.............

अस्योत्सवस्य ............. +............

कापि ............ +.............

7. अधोलिखित-क्रियापदानाम्, धातुम्, लकारम्, पुरुषम्, वचनं च लिखत-

क्रियापदम् धातुः लकारः पुरुषः वचनम् यथा- कुर्वन्ति कृ लट् प्रथम पु0 बहुवचनम्

अकरोत् ......... ............ ............... ....................

गच्छन्ति ......... ............ ............... ....................

भवेयुः ......... ............ ............... ....................

8. अधोलिखितपदानां विभक्तिं वचनं लिखत-

पदम् विभक्तिः वचनम्

यथा- भारतस्य षष्ठी एकवचनम्

इतिहासे ................ .........................

पुरोहितेन ................ .........................

बालिका ................ .........................

ओषधीनाम् ................ .........................

9. संस्कृतभाषायाम् अनुवादं कुरुत-

(क) घरों में श्रावणी की पूजा स्त्रियों द्वारा की जाती है।

(ख) इस दिन बहन भाई को राखी बाँधती है।

(ग) महारानी कर्मवती ने हुमायूँ के पास राखी भेजी।

(घ) हुमायूँ ने कर्मवती के सम्मान की रक्षा की।

(ङ) संस्कृत भाषा देश को एकता के सूत्र में बाँधती है।

10. प्रतीकचिह्नानाम् आधारे पर्वणां नामानि तत्सम्बन्धी द्वे द्वे वाक्ये च लिखत-

 

................ ...............

................ ...............

 

................ ..............

................ ..............

शिक्षण-सङ्केतः
बालकैः अस्य पाठस्य सारांशं लघुसमूहेषु लेखयत तथा रक्षाबन्धनेन सम्बन्धितकवितानां संकलनं कारयत।
एतदपि जानीत-
’उत्तर प्रदेश संस्कृत संस्थान’ लखनऊ में स्थित है।
किं किं न साधयति कल्पलतेव विद्या।

# पञ्चदशः पाठः नीतिश्लोकाः

**(विधिलिङ्लकारः)**

अक्रोधेन जयेत्क्रोधम् असाधुं साधुना जयेत्।
जयेत्कदर्यं दानेन जयेत्सत्येन चानृतम् ।।1।।
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत्।
सत्यपूतां वदेद् वाणीं मनःपूतं समाचरेत् ।।2।।
दिनान्ते च पिबेद् दुग्धं निशान्ते च पिबेत् पयः।
भोजनान्ते पिबेत् तक्रं किम् वैद्यस्य प्रयोजनम्।।3।।
शुकवद् भाषणं कुर्याद् बकवद् ध्यानमाचरेत्।
अजवच्चर्वणं कुर्याद् गजवत् स्नानमाचरेत् ।।4।।
वृत्तं यत्नेन संरक्षेद्, वित्तमेति च याति च
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।।5।।

**शब्दार्थाः**

जयेत् = जीते। कदर्यम् = कृपणता को। अनृतम् =झूठ को। न्यसेत् = रखे। पादम् =पैर को। वस्त्रपूतम् =कपड़े से (छानकर) शुद्ध हुए। मनःपूतम् = मन से पवित्र। दिनान्ते = दिन के अन्त में (सायं काल)। निशान्ते = रात के अन्त में। पयः = जल। तक्रम् = मट्ठा। शुकवद् = सुग्गे की तरह। बकवद् = बगुले की तरह। चर्वणम् = चबाना। वृत्तम् =आचरण । वित्तम् = धन ।

अन्वयः

(1) क्रोधम् अक्रोधेन जयेत्, असाधुं साधुना जयेत्, कदर्यं दानेन जयेत्, अनृतं च सत्येन जयेत्।

(2) दृष्टिपूतं पादं न्यसेत्, वस्त्रपूतं जलं पिबेत्, सत्यपूतां वाणीं वदेत्, मनःपूतं समाचरेत्।

(3) दिनान्ते दुग्धं पिबेत्, निशान्ते पयः पिबेत्, भोजनान्ते तक्रं पिबेत्, वैद्यस्य किं प्रयोजनम्। (किमपि प्रयोजनं नास्ति)।

(4) शुकवद् भाषणं कुर्यात्, बकवत् ध्यानम् आचरेत्, अजवत् चर्वणं कुर्यात्, गजवद् स्नानम् आचरेत्।

(5) यत्नेन वृत्तं संरक्षेद्, वित्तम् एति याति च वित्ततः क्षीणः अक्षीणः, वृत्ततः क्षीणः तु हतो हतः।

अभ्यासः

1. उच्चारणं कुरुत-

जयेत्क्रोधम् जयेत्कदर्यम् भोजनान्ते
अजवच्चर्वणम् स्नानमाचरेत् वृत्ततस्तु
2. एकपदेन उत्तरत-
(क) अनृतं केन जयेत् ?
(ख) कीदृशं जलं पिबेत् ?
(ग) भोजनान्ते किं पिबेत् ?
(घ) किं यत्नेन संरक्षेत् ?
3. 'क' स्तम्भं 'ख' स्तम्भेन योजयत-
(क) (ख)
जयेत्कदर्यं दानेन बकवद् ध्यानमाचरेत्।
सत्यपूतां वदेद् वाणीम् वृत्ततस्तु हतो हतः।
शुकवद् भाषणं कुर्यात् जयेत्सत्येन चानृतम्।
अक्षीणो वित्ततः क्षीणः निशान्ते च पिबेत् पयः।
दिनान्ते च पिबेत् दुग्धम् मनः पूतं समाचरेत्।
4. पाठे आगतानि विधिलिङ्लकारस्य रूपाणि चित्वा लिखत-
यथा- जयेत् ................. ................ ................ ।
5. संस्कृतभाषायाम् अनुवादं कुरुत-
(क) क्रोध को अक्रोध से जीतना चाहिए।
(ख) झूठ को सत्य से जीतना चाहिए।
(ग) कंजूस को दान के द्वारा जीतना चाहिए।
(घ) वस्त्र से छान कर पानी पीना चाहिए।
(ङ) मट्ठा भोजन के बाद पीना चाहिए।
(च) चरित्र की यत्नपूर्वक रक्षा करनी चाहिए।
6.हिन्दीभाषायाम् अनुवादं कुरुत-
(क) अक्रोधेन जयेत्क्रोधम् असाधुं साधुना जयेत्।
(ख) अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।
7.विलोम-पदानि लिखत-
यथा- क्रोधेन - अक्रोधेन
साधु - ........................
सत्यम् - ........................
कदर्यम् - ........................
दिनान्ते - ........................
शिक्षण-सङ्केतः

(क) श्लोकानां सामूहिकं पाठं कारयत।
(ख) अन्येषां नीतिश्लोकानां बोधं कारयत।
एतदपि जानीत-
कुछ अन्नों के नाम संस्कृत में-
गेहूँ गोधूमः उड़द माषः
जव यवः सरसों सर्षपः
अरहर आढकी मकई मकायः
चना चणकः मसूर मसूरः
मटर करेणुः धान धान्यम्
नहि कृतमुपकारं साधवो विस्मरन्ति।

# षोडशः पाठः अहिंसैव जयति


पुरा कोशलदेशे एकः भीषणः दस्युः अवसत्। तस्य नाम अङ्गुलिमालः आसीत्। लोकानां लुण्ठनं हननं च तस्य दैनिकं कृत्यम्। असौ यान् हन्ति स्म, तेषाम् अङ्गुलीः छित्त्वा ताभिः मालां विरच्य कण्ठे अधारयत्। अतः तस्य 'अङ्गुलिमाल' इति नाम्ना ख्यातिः जाता।

अङ्गुलिमालस्य दुष्कृत्यैः प्रजाऽतीव दुःखिता आसीत्। राजा प्रसेनजितोऽप्यस्य क्रूरकृत्येन भृशं कष्टं प्राप्नोत्। राजा तस्य निग्रहणे बहु प्रायतत, सैन्यबलं च प्रैषयत् परं तदपि साफल्यं नालभत।भगवतो बुद्धस्य शिष्यः
प्रसेनजितः तद्विषये बुद्धं न्यवेदयत्।बुद्धस्तदानीम् अङ्गुलिमालस्य समक्षं धर्ममुपदेष्टुं गतः परं सः बुद्धमवलोक्य क्रूरतया हन्तुम् अधावत्। बुद्धः स्वतपोबलेन ज्ञानं प्राकाशयत्। बुद्धस्य करुणार्द्रभावं विलोक्य स चकितोऽभूत् तथा बुद्धस्य समक्षमवनतोऽभवत्। बुद्धस्तदा धर्मस्य परहितस्य प्रेम्णः करुणायाश्च शिक्षां तस्मै चाददात्।
बुद्धस्य उपदेशप्रभावाद् अङ्गुलिमालस्य अज्ञानान्धकारः नष्टः। सः अङ्गुलीनां मालां छित्त्वा खड्गं प्राक्षिपत्। सः परपीडनं हिंसां च परित्यज्य दयाभावं प्राप्नोत्। बुद्धस्य सः शिष्यः अभवत्। एवं हिंसायाम् अहिंसाया एव विजयोऽभवत्।

**शब्दार्थाः**

पुरा=प्राचीन काल में। भीषणः=भयङ्कर। दस्युः=डाकू। लोकानाम्=जनता का। असौ=वह। लुण्ठनम्=लूटना। हन्ति स्म=मारता था। यान्=जिनक¨। अङ्गुलीः=अङ्गुलियों को। छित्वा=काटकर। विरच्य=बनाकर। अधारयत्=पहन लिया। भृशम्=अतिशय। निग्रहणे=पकड़ने में। प्रायतत=प्रयास किया। प्रैषयत्=भेजा। नालभत=नहीं प्राप्त किया। न्यवेदयत्=निवेदन किया। उपदेष्टुम्=उपदेश देने हेतु। हन्तुमधावत्=मारने के लिए दौड़ा। प्राकाशयत्=प्रकाशित किया। अवनतोऽभूत्=झुक गया। परपीडनम्=दूसरों को सताना। प्राक्षिपत्=फेंक दिया। हिंसायाम्=हिंसा पर।

**अभ्यासः**

1. उच्चारणं कुरुत-
अहिंसैव प्रजाऽतीव पै्रषयत्
न्यवेदयत् बुद्धस्तदानीम् धर्ममुपदेष्टुम्

2. एकपदेन उत्तरत-
(क) कोशलदेशे कः दस्युः आसीत्?
(ख) अङ्गुलिमालस्य दुष्कृत्यैः के दुःखिताः आसन्।
(ग) कस्य उपदेशप्रभावाद् अङ्गुलिमालस्य अज्ञानान्धकारः नष्टः अभवत्।
(घ) अङ्गुलिमालः हिंसां परित्यज्य कं भावं प्राप्नोत्।
3. रिक्तस्थानानां पूर्तिं कुरुत-
(क) लोकानाम् ............................... कृत्यम्।
(ख) बुद्धस्तदा ............................... चाददात्।
(ग) बुद्धस्य ................................. नष्टः।
(घ) सः परपीडनम् .............................. प्राप्नोत्।
ध्यातव्यम्
खाकर, पढ़कर, आकर, देकर इति पदानां कृते धातुना सह क्त्वा (त्वा) ल्यप् (य) प्रत्ययौ योजयित्वा खादित्वा, पठित्वा, आगत्य, आदाय पदानि च रचयामः। वाक्ये- 'प्रवीणः रोटिकां खादित्वा विद्यालयं गच्छति' प्रयोगः भवति।
4. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-
नीत्वा पठित्वा दृष्ट्वा श्रुत्वा त्यक्त्वा पीत्वा
(क) रमा विद्यालयात् ............................... आगच्छति।
(ख) वाहिदः चित्रं ............................... हसति।
(ग) बालकः कथां ................................ शेते।
(घ) मोहनः दुग्धं ..............................क्रीडति।
(ङ) पक्षिणः तृणं ............................... उत्पतन्ति।
(च) वयं दुर्गुणान् ............................... सन्मार्गे चलामः।
5. सन्धिविच्छेदं कुरुत-
पदम् सन्धिविच्छेदः
यथा- प्रजातीव प्रजा+अतीव
अज्ञानान्धकारः .............. +...............
करुणार्द्रभावम् ............... +...............
बुद्धस्तदा ............... +...............
6. चक्रमध्ये त्रिषु लकारेषु क्रियापदानि सन्ति, तानि योजयित्वा वाक्यानि रचयत-



यथा- त्वं भोजनं कृत्वा पठ।

..........................................।

..........................................।

..........................................।

..........................................।

..........................................।

..........................................।

शिक्षण-सङ्केतः

1. अहिंसया हिंसां जेतुं शक्नुमः एतद् विषये छात्रान् बोधयत।

2. अङ्गुलिमालस्य विषये उक्ता इयं कथा बौधजातकाद् गृहीता अस्ति।
बौधजातके एतादृश्यः अन्याः कथाःअपि सन्ति इति छात्रान् बोधयत।

3. शिक्षकः कक्षायाम् अस्य पाठस्य अभिनयं कारयेत्।

एतदपि जानीत-

हमारे राष्ट्रीय चिह्न पर अंकित वाक्य ‘सत्यमेव जयते’ मुण्डकोपनिषद् से लिया गया है।
अहिंसा परमो धर्मः।

# सप्तदशः पाठः प्रयाण गीतम्



पदं पदं प्रवर्धते
किशोरगुल्मसैनिकः।
जयत्व-कामनायुतः
विजेतृगीतगायकः।।1।।
स्वतन्त्रता-प्रवर्तकः
स्वतन्त्रदेशरक्षकः।
स्वतन्त्रता-सुवर्ण-जन्य-
वर्ण-मोद-वर्धकः।। पदं पदं प्रवर्धते।।2।।
अशोक-चक्रशोभितः,
करे ध्वजः त्रिवर्णिकः।
हृदि प्रतापवीरता,
अदम्यसाहसान्वितः।। पदं पदं प्रवर्धते।।3।।
न मार्गरोधने क्षमाः,
समुद्रपर्वतादिकाः।
समस्तवैरिनाशकः,
यथा सुवीरसायकः।। पदं पदं प्रवर्धते।।4।।

**शब्दार्थाः**

गुल्म=सैन्यदल। विजेतृ=विजेता। मोद=प्रसन्नता। त्रिवर्णिकः=तीनवर्णों वाला, तिरङ्गा। अदम्य=जिसका दमन न किया जा सके। साहसान्वित=साहसयुक्त, साहसी। रोधने=रोकने में। सुवीरसायकः=अच्छे वीरों के बाण। प्रतापवीरता=राणाप्रताप की वीरता। स्वतन्त्रता-सुवर्ण-जन्य-वर्ण-मोद-वर्धकः=स्वतन्त्रता रूपी स्वर्ण से उत्पन्न स्वर्णिम आनन्द क¨ बढ़ाने वाला। प्रवर्धतेआगे बढ़ रहा है। क्षमाः=समर्थ।

अन्वयः

(1) जयत्व-कामनायुतः विजेतृगीतगायकः किशोरगुल्मसैनिकः पदं पदं प्रवर्धते।

(2) स्वतन्त्रताप्रवर्तकः स्वतन्त्रदेशरक्षकः स्वतन्त्रता-सुवर्ण-जन्य-वर्ण-मोद-वर्धकः (पदं पदं प्रवर्धते)
(3) अशोकचक्रशोभितः त्रिवर्णिकः ध्वजः(यस्य)करे, प्रतापवीरता(यस्य) हृदि, अदम्यसाहसान्वितः(सः) पदं पदं प्रवर्धते।
(4) समुद्रपर्वतादिकाः(यस्य) मार्गरोधने न क्षमाः,(यः) सुवीर-सायकः यथा समस्तवैरिनाशकः, (सः) पदं पदं प्रवर्धते।

अभ्यासः

1. उच्चारणं कुरुत-
विजेतृ गीतगायकः त्रिवर्णिकः
समस्तवैरिनाशकः अदम्यसाहसान्वितः प्रवर्धते

2. एकपदेन उत्तरत-
(क) कः पदं पदं प्रवर्धते?
(ख) ध्वजः कीदृशः अस्ति?
(ग) के मार्गरोधने क्षमाः न सन्ति?
(घ) किशोरगुल्मसैनिकः कः इव समस्तवैरिनाशकः अस्ति?

3. रिक्तस्थानानां पूर्तिं कुरुत-
(क) किशोरगुल्म- ............................।
(ख) विजेतृगीत- ............................।
(ग) स्वतन्त्रदेश- ............................।
(घ) वर्णमोद- ............................।

4. अधोलिखित-पदानां विलोमपदानि लिखत-
यथा- स्वतन्त्रता - परतन्त्रता
रक्षकः - .....................
क्षमाः - .....................
वीरता - .....................

5. हिन्दीभाषायाम् अनुवादं कुरुत-
(क) भारतीय ध्वज में अशोक चक्र सुशोभित है।
(ख) देशभक्तों का मार्ग रोकने में कोई समर्थ नहीं है।
(ग) राष्ट्रसैनिकों की जय हो।
(घ) देश के शत्रुओं का नाश हो।

6. अधोलिखित-पदानां विभक्तिं वचनं च लिखत-
पदम् विभक्तिः वचनम्
यथा- देशेन तृतीया एकवचनम्

किशोरान् ................ ....................
अशोकस्य ................ ....................
शोभिते ................ ....................
चक्रात् ................ ....................

शिक्षण-सङ्केतः

(क) अस्य पाठस्य सर्वेषां पद्यानां सैन्यगीतस्य ध्वनौ गानस्य अभ्यासं कारयत।

(ख) राष्ट्रस्य विषये दश वाक्यानि लेखयत।

एतदपि जानीत-

भारतीय संस्कृति में चार पुरुषार्थ होते हैं-
धर्म, अर्थ, काम, मोक्ष।

# व्याकरणम्

## वर्णपरिचय

संस्कृत भाषा में वर्ण दो प्रकार के होते हैं - स्वर और व्यञ्जन - इन्हें क्रमशः अच् और हल् भी कहते हैं -

अ इ उ ऋ लृ -- ह्रस्व   साधारण स्वर
आ ई ऊ ॠ -- दीर्घ

ए ऐ ओ औ -- दीर्घ   -- संयुक्त स्वर

## व्यञ्जन

क ख ग घ ङ = क वर्ग   स्पर्श वर्ण
च छ ज झ = च वर्ग
ट ठ ड ढ ण= ट वर्ग
त थ द ध न = त वर्ग
प फ ब भ म = प वर्ग

य र ल व ______ अन्तःस्थ वर्ण
श ष स ह ______ऊष्म वर्ण

क् + ष = क्ष   संयुक्ताक्षर
त् + र = त्र
ज् +ञ = ज्ञ
श् + र = श्र

उपर्युत सभी यञ्जन वर्णों में 'अ' का संयोग है । अ के बिना इनका स्वरूप होगा - क्, ख्, ग्, घ् इत्यादि । इस रूप को 'हल्' कहा जाता है तथा इसका संकेतक चिह्न ( ् ) है।

वाक्य में वर्णों के अतिरिक्त कुछ अन्य ध्वनि प्रतीकों का भी उपयोग किया जाता है जो वर्णमाला में सम्मिलित न होते हुए भी अर्थबोध में सहायक होते हैं , इन्हें अयोगवाह कहा जाता है, ये निम्नलिखित हैं।

अनुस्वार अं ( ं )                    अयोगवाह
विसर्ग अः (: )
चन्द्रबिन्दु अँ ( ँ )
चन्द्री (आगत ध्वनि) अॅ ( ॅ )

जिन वर्णों का उच्चारण मुख और नासिका के सहयोग से किया जाता है, उन्हें अनुनासिक कहते हैं। ङ, ´, ण, न और म अनुनासिक वर्ण हैं। सभी स्र दो प्रकार के होते हैं-- अनुनासिक और निरनुनासिक।

## वर्णों का उच्चारण स्थान

अ आ क ख ग घ ङ ह विसर्ग (:)---कण्ठ
इ ई च छ ज झ ´ य श------------ तालु
ऋ ॠ ट ठ ड ढ ण र ष------------मूर्धा
लृ त थ द ध न ल स--------------दन्त
उ ऊ प फ ब भ म-----------------ओष्ठ
ए ऐ------------------------------ कण्ठतालु
ओ औ-----------------------------कण्ठौष्ठ
व--------------------------------- दन्तौष्ठ
ङ, ञ, ण, न और म का उच्चारण स्थान स्ववर्गीय स्थान + नासिका है ।

## माहेश्वर सूत्र के अनुसार वर्णपरिचय

सन्धि-ज्ञान में प्रत्याहारों के ज्ञान की आवश्यकता होती है और प्रत्याहारों के ज्ञान के लिए माहेश्वर सूत्रों का ज्ञान आवश्यक है। अतः यहाँ माहेश्वर सूत्र दिये जा रहे हैं--
1. अ इ उ ण् 2. ऋ लृ क् 3. ए ओ ङ् 4. ऐ औ च्
5. ह य व र ट् 6. ल ण् 7. ञ म ङ ण न म 8. झ भ ञ्
9. घ ढ ध ष् 10. ज ब ग ड द श् 11. ख फ छ ठ थ च ट त व्
12. क प य् 13. श ष स र् 14. हल् ।

ये चैदह माहेश्वर सूत्र हैं। इनके अन्तिम वर्ण इत् कहलाते हैं। प्रत्याहार में इनकी गणना नहीं की जाती है। प्रत्याहार इस प्रकार हैं-

अक् = अ इ उ ऋ लृ,

एङ्= ए ओ,

एच् = ए ओ ऐ औ,

ऐच् = ऐ औ,

अच्= अ इ उ ऋ लृ ए ओ ऐ औ,

जश् = ज ब ग ड द इत्यादि ।

## सन्धि

दो वर्णों के मेल को सन्धि कहते हैं । ये मुख्यतः तीन हैं --

1. अच् सन्धि (स्वर सन्धि ) 2. हल् सन्धि (व्यञ्जन सन्धि) 3. विसर्ग सन्धि

स्वर सन्धियाँ कई प्रकार की हैं । उनमें से दो यहाँ दी जा रही हैं --

**1. दीर्घ - (अकः सवर्णे दीर्घः)** - अक् (अ/आ, इ/ई, उ/ऊ, ऋ,/ॠ) से सवर्ण (समान अच्- अ/आ, इ/ई, उ/ऊ, ऋ/ॠ) के बाद में रहने पर दोनों के स्थान में दीर्घ होता है, जैसे:-

यथा- शब्द+अर्थः = शब्दार्थः। वात + आवरणम् = वातावरणम् ।

विद्या + आलयः = विद्यालयः, विद्या + अर्थी = विद्यार्थी

रवि + इन्द्रः = रवीन्द्रः गिरि + ईशः = गिरीशः

मही + इन्द्र = महीन्द्रः श्री + ईशः = श्रीशः

गुरु + उपदेशः = गुरूपदेशः लघु + ऊर्मिः = लघूर्मिः

वधू + उत्सवः = वधूत्सवः भू + ऊर्जा = भूर्जा

पितृ + ऋणम् = पितृणम्

**2. गुण - (आद् गुणः)**- अ/आ के बाद इ/ई, उ/ऊ, ऋ/ॠ अथवा लृ के रहने पर दोनों के स्थान पर क्रमशः गुण (ए, ओ, अर्, अल्) हो जाता है, जैसे -

उप + इन्द्र = उपेन्द्रः उमा + ईशः = उमेशः

महा + इन्द्रः = महेन्द्रः गण + ईशः = गणेशः

सूर्य + उदयः = सूर्योदयः महा + उत्सवः = महोत्सवः

महा + ऊर्जा = महोर्जा सूर्य + ऊष्मा = सूर्योष्मा

वसन्त + ऋतुः = वसन्तर्तुः वर्षा + ऋतुः = वर्षर्तुः तव+लृकारः = तवल्कारः

## शब्द रूप

शब्द पाँच प्रकार के होते हैं - 1. संज्ञा 2. सर्वनाम 3. विशेषण 4. अव्यय 5. क्रिया।

संज्ञाएँ छह प्रकार की होती हैं-

1. स्वरान्त (अजन्त) पुंल्लिङ्ग 2. स्वरान्त (अजन्त) स्त्रीलिङ्ग
4. स्वरान्त (अजन्त) नपुंसकलिङ्ग 4. हलन्त (व्यञ्जनान्त) पुंल्लिङ्ग
5. हलन्त (व्यञ्जनान्त) स्त्रीलिङ्ग 6. हलन्त (व्यञ्जनान्त) नपुंसकलिङ्ग ।
इन सबके रूप तीनों वचनों (एकवचन, द्विवचन तथा बहुवचन) और सातों विभक्तियों (प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी) में चलते हैं। सम्बोधन प्रथमा से भिन्न नहीं है। रूप में अन्तर केवल एकवचन में होता है।

**अकारान्त (पुंल्लिङ्ग)**

**नर (मनुष्य)**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | नरः | नरौ | नराः |
| द्वितीया | नरम् | " | नरान् |
| तृतीया | नरेण | नराभ्याम् | नरैः |
| चतुर्थी | नराय | " | नरेभ्यः |
| पञ्चमी | नरात् | " | " |
| षष्ठी | नरस्य | नरयोः | नराणाम् |
| सप्तमी | नरे | " | नरेषु |
| सम्बोधनम् | हे नर ! | हे नरौ ! | हे नराः! |

राम, पुत्र, नृप, शिष्य, सूर्य, चन्द्र, मयूर, धर्म इत्यादि शब्दों के रूप नर शब्द के अनुसार होंगे।
जिस शब्द में ऋ, र, ष के बाद 'न' आता है, वहाँ तृतीया षष्ठी विभक्ति में न के स्थान पर ण होता है।

**बाल (बच्चा)**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | बालः | बालौ | बालाः |

| | | | |
|---|---|---|---|
| द्वितीया | बालम् | " | बालान् |
| तृतीया | बालेन | बालाभ्याम् | बालैः |
| चतुर्थी | बालाय | " | बालेभ्यः |
| पञ्चमी | बालात् | " | " |
| षष्ठी | बालस्य | बालयोः | बालानाम् |
| सप्तमी | बाले | " | बालेषु |
| सम्बोधनम् | हे बाल ! | हे बालौ ! | हे बालाः ! |

बालक, वृक्ष, लोक, पाठ, लेख, शिक्षक, अभ्यास, समय, अवकाश, इत्यादि शब्दों के रूप बाल शब्द के अनुसार होंगे।

**आकारान्त (स्त्रीलिङ्ग)**

**गङ्गा**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गङ्गा | गङ्गे | गङ्गाः |
| द्वितीया | गङ्गाम् | " | " |
| तृतीया | गङ्गया | गङ्गाभ्याम् | गङ्गाभिः |
| चतुर्थी | गङ्गायै | " | गङ्गाभ्यः |
| पञ्चमी | गङ्गायाः | " | " |
| षष्ठी | गङ्गायाः | गङ्गयोः | गङ्गानाम् |
| सप्तमी | गङ्गायाम् | " | गङ्गासु |
| सम्बोधनम् | हे गङ्गे! | हे गङ्गे! | हे गङ्गाः! |

**लता**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | लता | लते | लताः |
| द्वितीया | लताम् | लते | लताः |
| तृतीया | लतया | लताभ्याम् | लताभिः |
| चतुर्थी | लतायै | " | लताभ्यः |
| पञ्चमी | लतायाः | " | " |
| षष्ठी | " | लतयोः | लतानाम् |
| सप्तमी | लतायाम् | " | लतासु |
| सम्बोधनम् | हे लते! | हे लते! | हे लताः ! |

इसी प्रकार - बाला, कन्या, निशा, कला आदि शब्दों के रूप चलते हैं , लेकिन रमा, भार्या, तारा आदि के रूप में षष्ठी बहुवचन में ‘न’ को ‘ण’ होता है जैसे --रमाणाम् ।

**अकारान्त (नपुंसकलिङ्ग)**

**पुस्तक**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पुस्तकम् | पुस्तके | पुस्तकानि |
| द्वितीया | पुस्तकम् | " | पुस्तकानि |
| तृतीया | पुस्तकेन | पुस्तकाभ्याम् | पुस्तकैः |
| चतुर्थी | पुस्तकाय | " | पुस्तकेभ्यः |
| पञ्चमी | पुस्तकात् | " | पुस्तकेभ्यः |
| षष्ठी | पुस्तकस्य | पुस्तकयोः | पुस्तकानाम् |
| सप्तमी | पुस्तके | पुस्तकयोः | पुस्तकेषु |

| | | | |
|---|---|---|---|
| सम्बोधनम् | हे पुस्तक ! | हे पुस्तके ! | हे पुस्तकानि ! |

अकारान्त नपुंसकलिङ्ग शब्द के रूप तृतीया आदि विभक्तियों में अकारान्त पुंलिङ्ग शब्द के रूपों के समान होते हैं ।

**वन**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वनम् | वने | वनानि |
| द्वितीया | वनम् | वने | वनानि |
| तृतीया | वनेन | वनाभ्याम् | वनैः |
| चतुर्थी | वनाय | " | वनेभ्यः |
| पञ्चमी | वनात् | " | " |
| षष्ठी | वनस्य | वनयोः | वनानाम् |
| सप्तमी | वने | वनयोः | वनेषु |
| सम्बोधनम् | हे वन! | हे वने ! | हे वनानि |

मुख, कुसुम, पुष्प, कमल, मित्र (सुहृद्वाचक), तृण, ज्ञान, जल, बीज आदि के रूप भी इसी प्रकार चलते हैं । पुष्प, मित्र, शरीर आदि के प्रथमा,द्वितीया तथा षष्ठी बहुवचन में ‘न’ के स्थान पर ‘ण’ हो जाता है ।

**सर्वनाम**

सर्व, विश्व, किम्, यद्, तद्, एतद्, अस्मद्, युष्मद् आदि शब्द सर्वनाम कहलाते हैं, जो संज्ञा के स्थान पर सबके लिए प्रयोग किये जाते हैं । इनका सम्बोधन में रूप नहीं होता।

**सर्व (पुंल्लिङ्ग)**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सर्वः | सर्वौ | सर्वे |

| | | | |
|---|---|---|---|
| द्वितीया | सर्वम् | सर्वौ | सर्वान् |
| तृतीया | सर्वेण | सर्वाभ्याम् | सर्वैः |
| चतुर्थी | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| पञ्चमी | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| षष्ठी | सर्वस्य | सर्वयोः | सर्वेषाम् |
| सप्तमी | सर्वस्मिन् | सर्वयोः | सर्वेषु |

**सर्व (स्त्रीलिङ्ग)**

| | | | |
|---|---|---|---|
| प्रथमा | सर्वा | सर्वे | सर्वाः |
| द्वितीया | सर्वाम् | सर्वे | सर्वाः |
| तृतीया | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| चतुर्थी | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| पञ्चमी | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| षष्ठी | सर्वस्याः | सर्वयोः | सर्वासाम् |
| सप्तमी | सर्वस्याम् | सर्वयोः | सर्वासु |

**सर्व (नपुंसकलिङ्ग)**

| | | | |
|---|---|---|---|
| प्रथमा | सर्वम् | सर्वे | सर्वाणि |
| द्वितीया | सर्वम् | सर्वे | सर्वाणि |

शेष रूप पुंल्लिङ्ग के समान ।

**किम् (पुंल्लिङ्ग)**

| | | | |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

**किम् (स्त्रीलिङ्ग)**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

**किम् (नपुंसकलिङ्ग)**

| | | | |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |

विशेषः- शेष विभक्तियों के रूप पुंल्लिङ्ग के समान होते हैं ।

**अस्मद् (मैं, उत्तम पुरुष)**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्, मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः, नौ | अस्माकम्, नः |
| सप्तमी | मयि | आवयोः | अस्मासु |

विशेषः-'युष्मद्' (तुम, मध्यम पुरुष) का रूप 'मंजरी' कक्षा-6 के परिशिष्ट में देखिए।

**युष्मद् (तुम, मध्यम पुरुष)**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव, ते | युवयोः, वाम् | युष्माकम्, वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

विशेषः- अस्मद्, युष्मद् को छोड़कर सभी सर्वनाम और सम्पूर्ण संज्ञा शब्द प्रथम पुरुष क्रिया के साथ प्रयुक्त होते हैं। अस्मद् शब्द के साथ उत्तमपुरुष क्रिया एवं युष्मद् शब्द के साथ मध्यमपुरुष का प्रयोग किया जाता है।

# विशेषण

संज्ञा की विशेषता बताने वाले शब्द विशेषण कहे जाते हैं । ये जिनकी विशेषता बताते हैं, उन्हें विशेष्य कहते हैं । विशेषण शब्दों के रूप विशेष्य के समान होते हैं --
यल्लिङ्गं यद् वचनं या च विभक्तिः विशेष्येषु ।
तल्लिङ्गं तद् वचनं सा च विभक्तिः विशेषणेषु ।।
जैसे:-

| | | |
|---|---|---|
| सुन्दरः बालकः | सुन्दरी बालिका | सुन्दरं वनम् |
| सुन्दरं बालकम् | सुन्दरीं बालिकाम् | सुन्दरं पुष्पम् |
| सुन्दराः बालकाः | सुन्दर्यौ बालिके | सुन्दर्यः बालिकाः |
| शोभनः ग्रन्थः | शोभना पत्रिका | शोभनं पुस्तकम् |
| शोभनौ ग्रन्थौ | शोभने पत्रिके | शोभने पुस्तके |
| शोभनाः ग्रन्थाः | शोभनाः पत्रिकाः | शोभनानि पुस्तकानि |

# अव्यय

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।।
जिन शब्दों का तीनों लिङ्गांे, सभी विभक्तियों तथा तीनों वचनों में एक जैसा रूप होता है (बदलता नहीं) उन्हें अव्यय कहते हैं, जैसे --
श्वः - कल (आने वाला), ह्यः - कल (बीता हुआ)
ततः - तब, फिर, वहाँ से प्रायः - बहुधा
पश्चात् - बाद में, पीछे परन्तु - (परम्+तु) लेकिन
यद्यपि - (यदि+अपि) हालाँकि अधः - नीचे
इन शब्दों का प्रयोग वाक्य में क्रिया-विशेषण की तरह होता है

# कारक

'क्रियान्वयित्वं कारकत्वम्'- जिनका क्रिया के साथ सम्बन्ध होता है, उन्हें कारक कहते हैं।
कारक छः प्रकार के हैं-
कर्ता - प्रथमा विभक्ति (कर्तृवाच्य में), तृतीया विभक्ति (कर्म और भाववाच्य में),
कर्म - द्वितीया विभक्ति (कर्तृवाच्य में), प्रथमा विभक्ति (कर्मवाच्य में)
करण - तृतीया विभक्ति
सम्प्रदान - चतुर्थी विभक्ति
अपादान - पञ्चमी विभक्ति
अधिकरण - सप्तमी विभक्ति
सम्बन्ध तथा सम्बोधन कारक नहीं हैं। सम्बन्ध में षष्ठी विभक्ति होती है और सम्बोधन में प्रथमा।

रामः अग्निना स्थाल्यां तण्डुलं पचति।
कर्ता करण अधिकरण कर्म क्रिया
(प्रथमा) (तृतीया) (सप्तमी) (द्वितीया)

गुरुः छात्राय पुस्तकं ददाति।
सम्प्रदान
(चतुर्थी)

वृक्षात् पर्णं पतति।
अपादान
(पञ्चमी)

## संख्यावाचकाः शब्दाः (गणना)

| अङ्क | प्रातिपदिक | पुंल्लिङ्ग | स्त्रीलिङ्ग | नपुंसकलिङ्ग |
|---|---|---|---|---|
| 1. | एक | एकः | एका | एकम् |
| 2. | द्वि | द्वौ | द्वे | द्वे |
| 3. | त्रि | त्रयः | तिस्रः | त्रीणि |
| 4. | चतुर् | चत्वारः | चतस्रः | चत्वारि |



एकः बालकः एका बालिका एकम् फलम्

विशेष- चार से आगे की गिनतियाँ तीनों लिङ्गों में समान रूप से चलती हैं।

| | |
|---|---|
| 5. पञ्च | 13. त्रयोदश |
| 6. षट् | 14. चतुर्दश |
| 7. सप्त | 15. पञ्चदश |
| 8. अष्ट | 16. षोडश |
| 9. नव | 17. सप्तदश |
| 10. दश | 18. अष्टादश |
| 11. एकादश | 19. एकोनविंशतिः |
| 12. द्वादश | 20. विंशतिः |

'एक' शब्द का रूप (तीनों लिङ्गों में) केवल एकवचन में, द्वि शब्द का केवल द्विवचन में और त्रि से लेकर दश तक संख्यावाची शब्दों के रूप केवल बहुवचन में चलते हैं। नित्य स्त्रीलिङ्ग ऊनविंशति, विंशति आदि इकारान्त संख्यावाची शब्दों के रूप मति के समान केवल एकवचन में चलते हैं।

## धातुरूप

धातु- क्रियावाचक 'भू', 'पठ्' आदि को धातु कहते हैं। सभी धातुएँ भ्वादि, अदादि, जुहोत्यादि, दिवादि, स्वादि, तुदादि, रुधादि, तनादि, क्रयादि और चुरादि दस गणों में विभक्त हैं। इनमें रूप की दृष्टि से कुछ परस्मैपदी, कुछ आत्मनेपदी और कुछ उभयपदी हैं। काल और अवस्था के अनुसार इनका रूप 10 लकारों में होता है। पाठ्यक्रम में केवल पाँच लकार निर्धारित हैं- लट् (वर्तमान), लृट् (भविष्य), लोट् (आज्ञा), लङ् (भूत) और लिङ् (विधि इत्यादि)।

इनका रूप तीनों पुरुषों (प्रथम, मध्यम तथा उत्तम) के तीनों वचनों (एक0, द्वि0, बहु0) में चलता है।

**भू (होना)**

लट्लकारः (वर्तमानकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवति | भवतः | भवन्ति |
| मध्यमपुरुषः | भवसि | भवथः | भवथ |
| उत्तमपुरुषः | भवामि | भवावः | भवामः |

लोट्लकारः (आज्ञा/प्रार्थना)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | भवतु/भवतात् | भवताम् | भवन्तु |
| मध्यमपुरुषः | भव/भवतात् | भवतम् | भवत |
| उत्तमपुरुषः | भवानि | भवाव | भवाम |

लिङ्लकारः (विधि /सम्भावना)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | भवेत् | भवेताम् | भवेयुः |
| मध्यमपुरुषः | भवेः | भवेतम् | भवेत |
| उत्तमपुरुषः | भवेयम् | भवेव | भवेम |

लङ्लकारः (भूतकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अभवत् | अभवताम् | अभवन् |
| मध्यमपुरुषः | अभवः | अभवतम् | अभवत |
| उत्तमपुरुषः | अभवम् | अभवाव | अभवाम |

लृट्लकारः (भविष्यत्काल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

**पठ् (पढ़ना)**

लट्लकारः (वर्तमान काल)

| | | | |
| --- | --- | --- | --- |
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |

लोट्लकारः (आज्ञा/प्रार्थना)

| | | | |
| --- | --- | --- | --- |
| प्रथमपुरुषः | पठतु/पठतात् | पठताम् | पठन्तु |
| मध्यमपुरुषः | पठ/पठतात् | पठतम् | पठत |
| उत्तमपुरुषः | पठानि | पठाव | पठाम |

लिङ्लकारः (विधि/सम्भावना )

| | | | |
| --- | --- | --- | --- |
| प्रथमपुरुषः | पठेत् | पठेताम् | पठेयुः |
| मध्यमपुरुषः | पठेः | पठेतम् | पठेत |
| उत्तमपुरुषः | पठेयम् | पठेव | पठेम |

लङ्लकारः (भूतकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

लृट्लकारः (भविष्यत्काल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

**खेल् (खेलना)**

लट्लकारः (वर्तमानकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | खेलति | खेलतः | खेलन्ति |
| मध्यमपुरुषः | खेलसि | खेलथः | खेलथ |
| उत्तमपुरुषः | खेलामि | खेलावः | खेलामः |

लोट्लकारः (आज्ञा/प्रार्थना)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | खेलतु/खेलतात् | खेलताम् | खेलन्तु |
| मध्यमपुरुषः | खेल/खेलतात् | खेलतम् | खेलत |
| उत्तमपुरुषः | खेलानि | खेलाव | खेलाम |

लिङ्लकारः (विधि/सम्भावना )

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | खेलेत् | खेलेताम् | खेलेयुः |
| मध्यमपुरुषः | खेलेः | खेलेतम् | खेलेत |
| उत्तमपुरुषः | खेलेयम् | खेलेव | खेलेम |

लङ्लकारः (भूतकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अखेलत् | अखेलताम् | अखेलन् |
| मध्यमपुरुषः | अखेलः | अखेलतम् | अखेलत |
| उत्तमपुरुषः | अखेलम् | अखेलाव | अखेलाम |

लृट्लकारः (भविष्यत्काल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | खेलिष्यति | खेलिष्यतः | खेलिष्यन्ति |
| मध्यमपुरुषः | खेलिष्यसि | खेलिष्यथः | खेलिष्यथ |
| उत्तमपुरुषः | खेलिष्यामि | खेलिष्यावः | खेलिष्यामः |

**गम् (गच्छ्) जाना**

लट्लकारः (वर्तमानकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यमपुरुषः | गच्छसि | गच्छथः | गच्छथ |
| उत्तमपुरुषः | गच्छामि | गच्छावः | गच्छामः |

लोट्लकारः (आज्ञा/प्रार्थना)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छतु/गच्छतात् | गच्छताम् | गच्छन्तु |
| मध्यमपुरुषः | गच्छ/गच्छतात् | गच्छतम् | गच्छत |
| उत्तमपुरुषः | गच्छानि | गच्छाव | गच्छाम |

लिङ्लकारः (विधि/ संम्भावना)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | गच्छेत् | गच्छेताम् | गच्छेयुः |
| मध्यमपुरुषः | गच्छेः | गच्छेतम् | गच्छेत |
| उत्तमपुरुषः | गच्छेयम् | गच्छेव | गच्छेम |

लङ्लकारः (भूतकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यमपुरुषः | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तमपुरुषः | अगच्छम् | अगच्छाव | अगच्छाम |

लृट्लकारः (भविष्यत्काल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरूषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

**नम् (नमस्कार करना/झुकना)**

## लट्लकारः (वर्तमानकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | नमति | नमतः | नमन्ति |
| मध्यमपुरुषः | नमसि | नमथः | नमथ |
| उत्तमपुरुषः | नमामि | नमावः | नमामः |

## लोट्लकारः (आज्ञा/प्रार्थना)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | नमतु/नमतात् | नमताम् | नमन्तु |
| मध्यमपुरुषः | नम/नमतात् | नमतम् | नमत |
| उत्तमपुरुषः | नमानि | नमाव | नमाम |

## लिङ्लकारः (विधि/सम्भावना)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नमेत् | नमेताम् | नमेयुः |
| मध्यमपुरुषः | नमेः | नमेतम् | नमेत |
| उत्तमपुरुषः | नमेयम् | नमेव | नमेम |

## लङ्लकारः (भूतकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अनमत् | अनमताम् | अनमन् |
| मध्यमपुरुषः | अनमः | अनमतम् | अनमत |
| उत्तमपुरुषः | अनमम् | अनमाव | अनमाम |

## लृट्लकारः (भविष्यत्काल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | नंस्यति | नंस्यतः | नंस्यन्ति |
| मध्यमपुरुषः | नंस्यसि | नंस्यथः | नंस्यथ |
| उत्तमपुरुषः | नंस्यामि | नंस्यावः | नंस्यामः |

**पा (पिब्)-पीना**

लट्लकारः (वर्तमानकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | पिबति | पिबतः | पिबन्ति |
| मध्यमपुरुषः | पिबसि | पिबथः | पिबथ |
| उत्तमपुरुषः | पिबामि | पिबावः | पिबामः |

लोट्लकारः (आज्ञा/प्रार्थना)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | पिबतु/पिबतात् | पिबताम् | पिबन्तु |
| मध्यमपुरुषः | पिब/पिबतात् | पिबतम् | पिबत |
| उत्तमपुरुषः | पिबेयम् | पिबेव | पिबेम |

लिङ्लकारः (विधि/ सम्भावना)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | पिबेत् | पिबेताम् | पिबेयुः |
| मध्यमपुरुषः | पिबेः | पिबेतम् | पिबेत |
| उत्तमपुरुषः | पिबेयम् | पिबेव | पिबेम |

लङ्लकारः (भूतकाल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अपिबत् | अपिबताम् | अपिबन् |
| मध्यमपुरुषः | अपिबः | अपिबतम् | अपिबत |
| उत्तमपुरुषः | अपिबम् | अपिबाव | अपिबाम |

लृट्लकारः (भविष्यत्काल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | पास्यति | पास्यतः | पास्यन्ति |
| मध्यमपुरुषः | पास्यसि | पास्यथः | पास्यथ |
| उत्तमपुरुषः | पास्यामि | पास्यावः | पास्यामः |

**अस् (होना)**

लट्लकारः (वर्तमानकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमपुरुषः | असि | स्थः | स्थ |
| उत्तमपुरुषः | अस्मि | स्वः | स्मः |

लोट्लकारः (आज्ञा/प्रार्थना)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अस्तु/स्तात् | स्ताम् | सन्तु |
| मध्यमपुरुषः | एधि/स्तात् | स्तम् | स्त |
| उत्तमपुरुषः | असानि | असाव | असाम |

लिङ्लकारः (विधि/सम्भावना)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | स्यात् | स्याताम् | स्युः |

| | | | |
|---|---|---|---|
| मध्यमपुरुषः | स्याः | स्यातम् | स्यात |
| उत्तमपुरुषः | स्याम् | स्याव | स्याम |

लङ्लकारः (भूतकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | आसीत् | आस्ताम् | आसन् |
| मध्यमपुरुषः | आसीः | आस्तम् | आस्त |
| उत्तमपुरुषः | आसम् | आस्व | आस्म |

लृट्लकारः (भविष्यत्काल)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

**कृ धातु (करना)**

लट्लकारः (वर्तमानकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमपुरुषः | करोषि | कुरुथः | कुरुथ |
| उत्तमपुरुषः | करोमि | कुर्वः | कुर्मः |

लोट्लकारः (आज्ञा/प्रार्थना)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | करोतु/कुरुतात् | कुरुताम् | कुर्वन्तु |

| | | | |
|---|---|---|---|
| मध्यमपुरुषः | कुरु/कुरुतात् | कुरुतम् | कुरुत |
| उत्तमपुरुषः | करवाणि | करवाव | करवाम |

लिङ्लकारः (विधि/सम्भावना)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | कुर्यात् | कुर्याताम् | कुर्युः |
| मध्यमपुरुषः | कुर्याः | कुर्यातम् | कुर्यात |
| उत्तमपुरुषः | कुर्याम् | कुर्याव | कुर्याम |

लङ्लकारः (भूतकाल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमपुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमपुरुषः | अकरवम् | अकुर्व | अकुर्म |

लृट्लकारः (भविष्यत्काल)

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यमपुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमपुरुषः | करिष्यामि | करिष्यावः | करिष्यामः |

# Table of Contents


1. Table of Contents
2. 
3. भारत-वन्दना
4. प्रथमः पाठः चित्रपाठः
5. द्वितीयः पाठः चित्रपाठः
6. तृतीयः पाठः विभक्तयः
7. चतुर्थः पाठः उद्बोधनम्
8. पञ्चमः पाठः मम विद्यालयः
9. षष्ठः पाठः सूर्यः आत्मा जगतः
10. सप्तमः पाठः सुभाषितानि
11. अष्टमः पाठः शङ्कराचार्यः
12. नीलशृगालः नवमः पाठः
13. दशमः पाठः प्रहेलिकाः
14. एकादशः पाठः गणतन्त्रदिवस-समारोहः
15. द्वादशः पाठः चन्द्रशेखरः आजादः
16. त्रयोदशः पाठः काकः
17. चतुर्दशः पाठः रक्षाबन्धनम्
18. पञ्चदशः पाठः नीतिश्लोकाः
19. षोडशः पाठः अहिंसैव जयति
20. सप्तदशः पाठः प्रयाण गीतम्
21. व्याकरणम्
22. विशेषण
23. अव्यय
24. कारक
25. संख्यावाचकाः शब्दाः (गणना)

# Table of Contents


1. भारत-वन्दना
2. प्रथमः पाठः चित्रपाठः
3. द्वितीयः पाठः चित्रपाठः
4. तृतीयः पाठः विभक्तयः
5. चतुर्थः पाठः उद्बोधनम्
6. पञ्चमः पाठः मम विद्यालयः
7. षष्ठः पाठः सूर्यः आत्मा जगतः
8. सप्तमः पाठः सुभाषितानि
9. अष्टमः पाठः शङ्कराचार्यः
10. नवमः पाठः नीलशृगालः
11. दशमः पाठः प्रहेलिकाः
12. एकादशः पाठः गणतन्त्रदिवस-समारोहः
13. द्वादशः पाठः चन्द्रशेखरः आजादः
14. त्रयोदशः पाठः काकः
15. चतुर्दशः पाठः रक्षाबन्धनम्
16. पञ्चदशः पाठः नीतिश्लोकाः
17. षोडशः पाठः अहिंसैव जयति
18. सप्तदशः पाठः प्रयाण गीतम्
19. व्याकरणम्
20. विशेषण
21. अव्यय
22. कारक
23. संख्यावाचकाः शब्दाः (गणना)
24. Table of Contents

## *Table of Contents*


1. Table of Contents
2. 1
3. 2
4. 3